50. Bāṇeśvara comes off with flying colours when judged in the light of the dictum **गद्यं कवीनां निकषं वदन्ति** quoted by Vāmana in his **काव्यालङ्कारसूत्रवृत्ति** on **का० सू** I. 3. 21.

51. **शब्दार्थयोः समो गुम्फः पाञ्चाली रीतिरिष्यते ।**

52. **ओजः समासभूयस्त्वमेतद् गद्यस्य जीवितम्**—**काव्यादर्श**, I. 80.

53. Mode of speech based on Śleṣa (puns) is known as Vakrokti which has been raised even to the position of an Arthālaṅkāra. Subandhu, Baṇa and Kavirāja are famous for this kind of speech :—

सुबन्धुर्बाणभट्टश्च कविराज इति त्रयः ।
वक्रोक्तिमार्गनिपुणाश्चतुर्थो विद्यते न वा ॥
See **राघवपाण्डवीय** by **कविराज** ।

techniques of rhetoric. Poetic conventionalities apart, he seems to have been a keen observer of men and things and of Nature, as the description of his patron's court, of various incidents and of forest scenes, shows.

As already mentioned, Bāṇeśvara was a poet to the core, and his reputation as a bright luminary in the firmament of Sanskrit verse has been fully sustained in this work. Ślokas resplendent with high poetic imagery and beauty of expression—veritable poetic gems!—are scattered all over the work. His verses are generally sweet, elegant and graceful. Special mention may be made of the melodious hymn to Yamunā and Govindadeva, which cannot but stir the hearts of cultured people.

According to modern ideas, the chief defect of his style consists in this that the work is replete with puns on words and abstruse allusions But he is in good company, for Bāṇa's and Subandhu's works are of the same category. Brought up as Bāṇeśvara was in the traditional school of classical Sanskrit, it was only natural that he should walk in the footsteps of his predecessors. Again, when we remember that our ideas of literary style are different from those held in ancient India, we should think twice before condemning his involved language, puns on words and recondite allusions as blemishes.

Though a Śākta by practice and persuasion, Bāṇeśvara seems to inculcate Vaiṣṇavite Vedantism in this work. This may lead the readers to a misapprehension as to the particular religious beliefs

he held. Along with Vaiṣṇavite Vedantic doctrine he inculcates the tenets of the Śākta school as a reference to Ṣaṭcakrabheda shows. Thus in this work there is a happy amalgam of the teachings of the two different sectarian schools of Hinduism—a fact which proves that sectarian orthodoxy had no place in his composition.

Possessing, as it does, wealth of description, vigour of narrative, chaste and learned diction, elegant and graceful verses, the work entitles the author to rank high as a poet.

V. The Text

The text is based on a single Ms., viz, the one presented by H. T. Colebrooke to the India Office Library. The No. of the Ms. is 939a. There are 61 Foll. and its size is 12″ × 4″. The paper used is of the yellow country-made variety. The handwriting resembles good modern Bengali handwriting. The Ms. gives neither the date of the copy nor the name of the scribe. It bears the usual characteristics of Bengal Mss., viz, reduplication of consonants with र (more than 60 per cent of such consonants being reduplicated), non-differentiation between ब and व and confusion in the use of certain letters of the alphabet having similar appearance and sound. Excepting obvious mistakes of spelling in the use of श, ष and स, ण and न, इ and ई, उ and ऊ and ब and व, all scribal mistakes have been noticed in footnotes. By a reference to the Ms. readings the reader will know that besides committing mistakes of the aforesaid kind, the scribe sometimes does not make Sandhis

or compounds of words, transposes syllables, uses redundant words, omits or repeats letters and words and fails to read certain letters of the Ms. from which he was copying.

For the sake of simplicity and uniformity, the practice of reduplicating consonants with र has been abandoned in this edition. The omissions of the scribe have been filled in with letters or words that seemed plausible and they have all been enclosed in brackets. The punctuation marks are the editor's own. In the face of so many scribal mistakes the work of emending has not been unattended with difficulty, since editing had to be done with the help of a single Ms.

VI. Date of Composition.

As mentioned by the poet himself (Text, Page 12, Line 11), the Marāṭhā incursion took place at the end of the Śāka era 1664, i. e. in the beginning of April 1742 A. D. Obviously, the poem was composed after this date. The poet himself says that the book was composed in शाके कालाङ्कतकौषधिपतिगणिते (Text, Page 89, Sloka 267). Just below this verse शकाब्दाः १६६६ has been put by the scribe. We cannot arrive at this date unless काल stands for the figure 6, though it is usual to take काल as 3. Apparently काल[54] has been taken here to mean ऋतु.

54. The word काल led M.M. Haraprasāda Śastri into an error. In his article on Bāṇeśvara Vidyālaṅkāra in the Sāhitya-Pariṣat-Patrikā he gives the year of composition of this book as 1741 A. D.

—See Sāhitya-Pariṣat-Patrika, No. 3, 1338 B. S.

EDITOR'S ACKNOWLEDGMENT.

In editing this work I have received ample help from a number of gentlemen, without which I could not hope to bring out this volume. My special thanks are, however, due to H. N. Randle Esq., Librarian, India Office Library, London, who very kindly lent me the Ms.; to Mahāmahopādhyāya Pandit Gopīnātha Kavirāja, M.A., who has been kind enough to write a Foreword to the work; to Pandit Śyāmācaraṇa Kaviratna who has read the Ms. of the Text and made valuable suggestions; to my pupils Pandits Paraśurāma Choubey, Contractor, Barakar, Burdwan, Phaṇibhūṣaṇa Chakravarti, Contractor, Benares, and Keśavacandra Śukla, Deputy Collector, Ballia, who have kindly borne the greater part of the costs of publication; and, last but not the least, to Pandit Satyāṅgśumohana Mukhopādhyāya, M.A., who has rendered valuable help throughout. I have also consulted a most recent and authoritative work, "Alivardi and His Times", by Professor Kalikinkar Datta, M.A.,Ph.D., of the Calcutta University, to whom my obligations are due.

R. CHAKRAVARTI.

An analysis of the Poem.

After the usual benedictory verses the poet introduces the hero of the poem, Mahārājā Citrasena, who is an ideal ruler endowed with all the qualities that characterized the famous kings mentioned in the Epics and the Puraṇas. Then follows the king's routine of morning duties. He rises early in the morning and after bath in holy waters performs both kinds of Sandhyās. Then entering a white temple he worships his tutelary deity with various kinds of flowers and other offerings and recites stotras—some of them being of his own composition. Coming out of the temple he reaches the place where the Brāhmaṇa priests are busy making oblations to fire and reciting sacred hymns and the scriptures. After worshipping the Lord Śiva he falls prostrate at the feet of his Gurudeva, He next beckons to a cow named Gaṅgā, feeds her with fruits and makes obeisance to her. He takes his meal with his friends and relatives after feeding the Brāhmaṇas.

He has a minister named Māṇikyacandra who is a clever administrator, a veteran soldier and a patron of learning.

Then in the middle of the month of Vaiśākh in the Śāka year 1664 (1742 A.D.) when the people are in the midst of peace and plenty, the army of the Mahārāṣṭra King, Sāhu, bursts upon the plains of Bengal.

The people already aware of the extremely cruel nature of the raiders, are at a loss to know what

to do. With their families and valuables they leave their hearths and homes—their cry of distress filling the surrounding atmosphere.

The king to ensure safety to his subjects leaves the capital entrusting it to the care of his minister and marches with a large army to the great city of Viśālā lying between Dakṣiṇa Prayāga and the meeting place of the Ganges and the sea, where he stays for some days.

Here also he offers worship to gods and goddesses, gives away wealth to the needy and the Brāhmaṇas and enjoys the company of the learned.

Dismissing his court after 10 P. M. he enters his bedchamber led by an attendant. Sitting on his snow-white bed he performs Ṣaṭcakrabheda and then courts sleep.

One night it so happens that he has a wonderful dream. He finds himself ready to go a-hunting. A grand hunting party consisting of elephants, horses, dogs and camels carrying nets, musical instruments and other requisites, is organised. His footsoldiers carrying hawks on the palms of their hands and other attendants are ready for the start. The usual ceremonies over, the king mounts his own elephant and moves out. They leave behind human habitations and enter a forest inhabited by various kinds of birds and animals and resounding with noises and sounds set up by its denizens afraid of their own safety as well as by his own men.

They see a noble deer fleeing towards the west and give chase to it. But the king inadvertently rides many miles ahead of his companions. The sun sets, he is unable to trace the deer any longer, and feeling very thirsty and tired he wanders about on horseback in search of water. Soon a beautiful square plot of land grown over with various kinds of trees comes in sight, and riding fast he reaches it in a second. There he finds a beautiful lake named Satsaṅgasaras—the very sight of which removes his fatigue and fills his heart with joy.

Dismounting he leads his horse to the brink of the water for a bath and a drink. Then tying the animal to the branch of a tree on the bank overgrown with green grass, he himself descends into water and offers his evening prayers. He is at a loss to know how and where to pass the night, when a voice according him welcome to a city close by assails his ears.

Next his eyes fall on the form of a tender child—strong ropes of red, blue and white colour round his neck, one end of which is held by a dreadful-looking old woman—riding a horseless car without a driver. The child is constantly lashed by six monsters and tyrannized over by a very restless person with five deceitful followers. All these, however, presently disappear as if by magic.

Then an ethereal voice bids the king rest that night in the beautiful city to which he slowly advances. Entering a magnificent palace he is led to the divan of 'Prema-Bhakti Devī' before whom he prostrates

himself. The goddess raises the king from the floor, seats him by the side of her throne and refreshes him with fruits and drink from the 'Satsaṅgasaras', She then declares the king to be free from worldly bondage, tells him that in future she will not part company with him and promises to show him Bṛndāvana the next morning in her chariot drawn by his horse. He sleeps on a bed at the foot of the throne of the goddess.

The day dawns, the king gets up from sleep, and, his morning duties over, comes to the lake where he finds gods and other supernatural beings engaged in bathing.

Then yoking the horse to the chariot both start on their journey to Bṛndāvana. The goddess points out to him, Aṅgadeśa, Champā, Magadha, Hāriharkṣetra, the confluence of the Ganges and Gandak, Mithilā, the Soṇa and Karmanāsa, the Vindhyas and Vārāṇasī. Reaching Vārāṇasī and then Prayāga they have their bath in the holy stream of the Ganges, perform the necessary rites and then fly fast towards Bṛndāvana—the goddess pointing out Ayodhyā on the way. Reaching Bṛndāvana they bathe in the Yamunā and perform their evening duties. The king again has a glimpse of the tender child, but before he is able to inquire of the goddess about him, he suffers from a temporary loss of memory. They listen to a sweet hymn in praise of Govindadeva and bathe in Śyāmakuṇḍa and Rādhākuṇḍa. In reply to the king's question the goddess now explains the allegorical meanings of everything

relating to the child. She says that the tender child is the Jīvātman, the three ropes are the three guṇas—Sattva, Rajas and Tamas, the horrible-looking old woman is Māyā or Avidyā, the horseless car is the human body, the six monsters are the six evil propensities and the restless person and his followers are the *manas* and the *buddhīndriyas*, respectively. In this way she expounds the principles of Vaiṣṇavite Vedantism.

Informing him that he has attained beatitude during his very life time, the Devī endows the king with the divine vision which enables him to witness the transcendental līlā at Bṛndāvana. Both now worship Gopīśvara. The goddess then presents the king to Lord Kṛṣṇa and Rādhā who after showing high marks of favour, bless him. Then they depart for the city of Visālā via Ayodhyā as ordered by Lord Kṛṣṇa.

Visiting Mathurā they reach Ayodhyā where they bathe in the Sarayu and pay their homage to Rāma and Sītā. On their way back the goddess points out to him the confluence of the Sarayu and Ganges, the Dardari kṣetra, the hermitages of the sages Vālmīki and Cyavana, and Janakapura. Bathing at the confluence of the Gandak and Ganges, they reach Gayā on the Falgu where they perform the usual rites. Then they visit in succession Mandāra where they worship Madhusūdana, the gods Vaidyanātha and Vakreśvara and lastly Pancakūta where they pay homage to Rāma, Lakṣmaṇa, Sītā and Hanumān. The car now arrives at Ambikā where they

worship Devī Siddheśvarī. Then visiting Bṛndāvana-candra and Rāmacandra at Guptapallīpurī they fly to Triveṇī where they perform ablutions and finally reach Viśālā. Here the goddess showers blessings on the king and his minister Māṇikyacandra, and, recommending Bāṇeśvara to the good graces of the king, enters his heart.

The king is awakened in the morning to the strains of music by the musicians. Then his morning duties over, he relates the dream to the Brāhmaṇas of his court who congratulate him on his singular good fortune and bless him.

The poet brings the romance to a close after giving the king's pedigree as well as his own.

भूमिका

अस्मद्देशे बहवो गीर्वाणवाणीसेवकाः प्रादुर्भूय संस्कृतसाहित्यं परिपुष्टिमनयन्। किन्त्वेतदेवातीव दुःखाकरं यत्तेषां महात्मनां जीवनवृत्तं यथातथं प्रतिपत्तुं न शक्यते। एतत्काव्यप्रणेतुस्तत्रभवतो महामहोपाध्यायवाणेश्वरविद्यालङ्कारभट्टाचार्यमहाशयस्य जीवनवृत्तमपि तथैव। तथापि यावज्ज्ञानं समासेनाभिधातुमाधीयते यत्नः।

पुराऽस्मिन् वङ्गविषये हुगलीजनपदान्तःपातिनि भागीरथीतीरवर्तिनि विद्वद्भूयिष्ठे गुप्तपल्लीसंवसथे सद्ब्राह्मणान्ववाये शोभाकरभट्टाचार्यनामा प्रसिद्धपण्डितः सिद्धपुरुषश्चाविर्बभूव। यस्यासाधारणविद्यावत्तयाऽलौकिकशक्तिमत्तया च विमोहितः प्रसिद्धो मेलबन्धनकारो देवीवरघटकः शिष्यत्वमगमत्। बहवः पण्डिताः साधकाश्च समुद्भूय तं शोभाकरवंशं शोभासम्पन्नमकुर्वन्। अनुमिते च १६६५ खृष्टाब्दे वाणेश्वरोऽप्याकाशमिव राकानिशाकरस्तत्कुलमलंचकार जन्मना। तत्पिता रामदेवतर्कवागीशः सुप्रसिद्धनैयायिक आसीत्। तदीयमातृनाम तु कुतश्चिन्नाधिगम्यते साम्प्रतम्। सप्तवर्षोऽसौ वाणेश्वरो ज्ञातिपितृव्येण महाकविमथुरेशविद्यालङ्कारेण विरचितां पञ्चोत्तरशतश्लोकात्मिकां "श्यामाकल्पलतिकां" सकृदेवाकर्ण्य यथातथमावृत्त्या समुपस्थितान् सर्वान् सुतरां विस्माययामास। तदानीन्तनी "काले बाणुओ पण्डित हबे" (काले वाणोऽपि पण्डितो भविष्यति)—इति दैववाणीव तत्पितृवाणीयमद्यापि जनप्रवादवदनेकेषां मुखतः समाकर्ण्यते।

असौ वाणेश्वरः पितुः सकाशान्नानाशास्त्राण्यधीत्य विद्यालङ्कार इत्युपाधिनालङ्कृतो गुणग्राहिणा नवद्वीपाधिपतिना महाराजकृष्णचन्द्रेण सभाकविरूपेणादौ वृतोऽभवत्। तत आलिवर्दि खान् इत्यभिधानस्य वङ्गशासकस्य सभां सुभासयामास। तदनन्तरं वर्धमानाधिपतेः

कीर्तितकीर्तेः कीर्तिचन्द्रस्य सूनोर्महाराजचित्रसेनस्य सभासद् भूत्वा तदनुज्ञया १७४४ खृष्टाब्दे "चित्रचम्पू"मिमां, मुद्राराक्षसानुकरणेन "चन्द्राभिषेकं" नाम संस्कृतनाटकञ्च विरचय्यासाधारणं पाण्डित्यं कविप्रतिभानञ्च प्रकटयामास। तस्मिन्नेवाब्दे दिवमधिरूढे महाराज-चित्रसेने, पुनरपि महाराजं कृष्णचन्द्रमाश्रितवान्। तदनु कलिकाता-शोभाबाजार-राजवंशप्रतिष्ठापयितुर्महाराजनवकृष्णस्य सभाशोभां सम्पादयामास। तदानीमेव पाथुरियाघाटानिवासिनः प्रसिद्धधनिनः कृपारामघोषस्यानुरोधेन कुमारसम्भवमनुकृत्य विंशतिसर्गात्मकं "रहस्या-मृतं" नाम महाकाव्यं प्रणिनाय। १७५५ खृष्टाब्दे च "काशीशतकं" रचयित्वा, इङ्गराजाधिकृतेऽस्मिन् भारते वर्षे तदानीन्तनशासनकर्तुः ओयारिन् हेष्टिंस् इत्यभिधानस्याध्येषणयाऽपरैर्दशभिर्धर्मशास्त्राभिज्ञैः पण्डितैः सह "विवादार्णवसेतु"रितिनामधेयं दायभागविषयकं व्यव-हारशास्त्रं संकलयामास। स एव ग्रन्थः एन् वि-ह्यालहेड् इति नाम्ना इङ्गराजपण्डितेन १७६५ खृष्टाब्दे स्वभाषयाऽनूदितस्तात्कालिकात्रत्य-धर्माधिकरणाधिकृतानामिङ्गलण्डदेशीयानां प्रधानमवलम्बनमासीत्। उल्लिखितग्रन्थसमूहातिरिक्तमप्यसौ "तारास्तोत्रं" "शिवशतकं" "हनूमत्-स्तोत्रं" "देवीस्तोत्रं" च रचयाम्बभूव। तत्प्रणीता अनाविष्कृता अन्ये ग्रन्था आसन् न वेति न शक्यते ज्ञातुम। परन्तु कस्यचित्प्रश्नमात्रेण विषयविशेषसन्दर्शनमात्रेण चाक्लेशेन सुललितपदसंयोजितान् सद्भावसमन्वितान् सुप्रथितान् सुबहून् संस्कृतश्लोकान् रचयित्वासौ विशिष्टां प्रतिष्ठां स्वनिष्ठामकरोत्। सुधियामवगमार्थं तादृशाः कतिपये श्लोका अधस्तादुद्धियन्ते।

दुर्गे दुर्गभवाब्धिभङ्गभवभीभ्रान्तस्य भाषां शृणु
दृष्ट्वा देवि ददाति देयदयितं दीनं दयालुर्नटम्।
किं वा वक्ति विरक्तचित्ततया त्वं गच्छ माऽऽगाः पुन-
रित्थं वारमनेकमागतवति त्वं केन मूका मयि ॥१

देव्याः केशचयो निरीक्ष्य पतितान् देवान् मुनीन् पादयोः
सर्वाराध्यतया च तत्र परमोत्कर्षं विदित्वाऽपतत् ।
श्रीकाली चरणं गतस्य शरणं नो बन्धनं सम्भवे-
दित्यावेदयितुं बबन्ध नहि तं तन्मुक्तकेशी बभौ ॥२
शिवस्य निन्दया हि याऽत्यजद्वपुः स्वमेकदा ।
तदङ्घ्रिपङ्कजद्वयं शवे शिवे किमद्भुतम् ॥३
पाणौ मे नवनीतपुञ्ज इह भो हारश्च वक्षःस्थले
चूडायामपि चारुचन्द्रकशिखा कुत्रास्ति चित्तं हृतम् ।
पादाब्जे वचसेति जानु चरणौ संपात्य संगोपयन्
गोपालो हरिरेष तस्करतया खिन्नः स्वयं पातु वः ॥४
अनन्तचरणोपान्तचारिणी मलहारिणी ।
पुनर्भवच्छेदकरी गङ्गेव नखरञ्जनी ॥५
चिन्ताचक्रे भ्रमति नियतं मन्मनोमृत्तिकेय-
मार्द्रीभूता नयनसलिलैर्भ्राम्यते दैन्यदण्डैः ।
आशाकुम्भाः कति कति कृताश्छेदिताः कर्मसूत्रै-
र्जात्या विप्रः पुनरहमहो कुम्भकारोऽस्मि वृत्त्या ॥६
लज्जा मानसुता ममाद्यवनिता भिक्षाऽपरा दैन्यजा
तातैश्वर्यविगर्विता बलवती भिक्षा प्रगल्भाऽभवत् ।
सा लज्जा निहता तयैव तनयाशोकेन मानो मृतो
भिक्षा दैन्यसुता चिरात्पतिरता नाद्यापि मां मुञ्चति ॥७
स्खलितश्चकितश्छन्नः प्रयाणे तव भूपते ।
सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् ॥८
अलभ्यं यदायुःपलं स्वर्णभारै-
रहो तस्य दण्डो वृथा याति यामः ।
दिनं च त्रियामा प्रमादान्नराणा-
मितीवानिशं घोषयन्ती घटीयम् ॥१०

अप्रतिमप्रतिभाप्रतिभातोऽसौ कविः कस्मिन्नब्दे धरातलमिद-मधरीकृत्य सुरसमितिमितवानिति न शक्यं परिज्ञातुम्। किन्त्वसौ सुदीर्घजीवनमुपभुक्तवानित्यत्र न विद्यते काचिद्विचिकित्सेति।

काव्यस्यास्य प्रथमं तावन्मङ्गलाचरणं, महाराजचित्रसेनस्य तत्सचिवप्रवरस्य च चरितवर्णनमपि कृतं कविना। तदनु १७४२ खृष्टाब्दे वङ्गदेशे धूमकेतुभूतानामश्वारोहिमहाराष्ट्रीयचमूनामाकस्मिक-विभावेन सञ्जनितो "बर्गिर्हाङ्गामा" इति प्रसिद्धो निरतिशयनिष्ठुरो हृदयविदारकः सुमहानुपप्लवः साक्षाद्दृष्टवता सुष्ठुतरमुपवर्णितः। तत आ समाप्तेरुपद्रवस्य वर्धमानपुरपरिहारपुरःसरमन्यत्रावस्थानं चित्र-सेनस्ये सूचितम्। ततस्तदीयस्वप्नदर्शनव्याजेन भगवद्दर्शनलाभोपाय-भूता पुण्यस्थानप्रयाण-सत्सङ्ग-प्रेमभक्तिप्रभृतिसाधनसोपानपरम्परा, मायामोहितजीवस्य महती दुर्गतिस्तदुद्धृतिश्च प्रदर्शिता। ततो भूलोक-गोलोकभूतश्रीवृन्दावनगमनं श्रीराधाकृष्णविहारदर्शनं च वर्णितम्। ततो वरप्राप्तिर्जीवन्मुक्तिश्चाभिहितेति।

सुबन्धुर्बाणभट्टश्च कविराज इति त्रयः।
वक्रोक्तिमार्गनिपुणाश्चतुर्थो विद्यते न वा॥

इत्यनेन "राघवपाण्डवीय"महाकाव्योपक्रमोक्तश्लोकेन सं-सूचितस्तर्हितनः संशयः क्षुद्रतमेऽस्मिन् काव्ये यथासम्भवमनेन कविना निरस्त एवेति मन्यते।

मत्संगृहीत एकस्मिन्नेवादर्शपुस्तके लिपिकरप्रमादवशाद् बहुत्र पाठविकृतयः परिलक्षिताः। तत्र तत्र मया यथामति टिप्पण्यो विहिताः। तासान्तु ५६ पृष्ठेऽनवधानतया कृता तुर्या टिप्पणी सूरि-वर्यैर्वर्ज्या। अलमतिविस्तरेणेति।

सम्पादकस्य

चित्रचम्पूः ।

ॐ नमः श्रीकृष्णचन्द्राय ।

वन्दे करीन्द्राननमिन्दुमौलिं
वृन्दारकेन्द्रैरभिवन्द्यमानम् ।
विघ्नाटवीदारणदारुणैक-
दन्तं जगन्मङ्गलकुम्भकुम्भम् ॥१॥

अपि च

अङ्कारोहणवाञ्छया गिरिभुवो यान्तं प्रति स्वं हठाद्[1]
भ्रान्त्या वन्यमतङ्गजस्य कुपितं तद्ग्राहकण्ठीरवम्[2] ।
दृष्ट्वा चीत्कृतिगर्जितैस्त्रिजगतीमुद्वेपयन् सस्मितं
देव्याङ्के कलितः सुरासुरनुतो[3] लम्बोदरः पातु वः ॥ २ ॥

किञ्च

समन्तादुद्दामद्युतिनिहतघोरान्धतमसे
कलानाथश्रेणीकृतरुचिरभूषे निरुपमे ।
शरण्ये सम्पूज्ये निरवधिपरानन्दसदने
हरेः पादाम्भोजे तव हृदयभृङ्गो विहरतु ॥ ३ ॥

बिभ्राणां निखिलप्रकाशनकरीं सौदामिनीं शाश्वतीम्
प्रेमक्षौणिरुहैकवर्धनकरीं कान्तामनन्तास्पदाम् ।
बाह्याभ्यन्तरदुर्निवारबहुधासन्तापशान्तिप्रदां[4]
धाराञ्चारु वितन्वतीं स्मर मनः कादम्बिनीं कामपि ॥ ४ ॥

---

1. Ms. ०त् 2. Ms. ०ग्रर० 3. Ms. ०सु० 4. Ms. ०भ्या०

यद् गोलोकविलासकेलिरसिकं भ्रूभङ्गभङ्गीनव-
क्रीडाविष्कृतसर्गसंस्थितिलयं सारं श्रुतीनामपि ।
वृन्दारण्यनिकुञ्जपुञ्जभवनं तन्मे मनःपञ्जरे
राधामाधवसंज्ञितं विजयतामद्वन्द्वमाद्यं महः ॥ ५ ॥

कषितविमलहेमोद्दामरेखाङ्कमाला[1]-
वलयित इव भूयादिन्द्रनीलो मणिस्ते ।
हृदि निरवधिराधालिङ्गितश्रीमदङ्गो
निखिलहृदयहारिभूतरङ्गो मुरारिः ॥ ६ ॥

नत्वा श्रीगुरुपादपङ्कजयुगं श्रीरामपादाम्बुजं
श्रीमल्लक्ष्मणजानकीहनुमतां पादारविन्दान्यपि ।
धीरश्रीयुतचित्रसेनधरणीधीरेयचूडामणे-
रादेशेन समातनोति किमपि श्रीयुक्तवाणेश्वरः ॥ ७ ॥

पूर्वेषामतिमात्रहारिमधुरव्याहारलीलाभृतां
धीराणां भणितेषु सत्स्वपि समारम्भादिदम्भादिकम् ।
क्षन्तव्यं करुणामयैः सुकरुणा दृष्टिर्विधेया यतः
स्पर्श[:] स्पर्शमणेरयोऽपि तनुते हेमात्मनीनैर्गुणैः[2] ॥ ८ ॥

अभूदभूतप्रतिमो महामति-
र्महीपतिर्भूमिमहेन्द्रसन्ततिः ।
मनोभवस्पर्धिमनोहराकृति-
र्मुरारिपादाब्जयुगस्फुरन्मतिः[3] ॥ ९ ॥

निसर्गरम्याद्भुतसर्गकौतुकी
स्फुरत्त्रिवेदीचतुराननच्छविः ।
निबद्धपद्मासनसुन्दराकृतिः
सरोजयोनिर्भगवानिवापरः ॥ १० ॥

---

1. Ms. ०ना० 2. Ms. ०म्मु० 3. Ms. ०दो०

गिरा श्रिया च स्पुरदुत्तमाकृति-
र्जगत्परित्राणविधानसत्कृति[:]।
सुपुण्डरीकाक्षतया मनोहरो
रथाङ्गपाणिर्भगवानिवापरः ॥ ११ ॥

पुरार्जितैर्दुस्तरपूरिदुष्कृतै--
श्चिराय बद्धानपि यः स्वकेतने।
विमोचयामास दयार्द्रमानसः
पिनाकपाणिर्भगवानिवापरः ॥ १२ ॥

यश्च निखिलभूमिपालमौलिमालाविराजमानकिरीटघटाविजृम्भमाणमहामणिनिवहमयूखमण्डलीनीराजनातिविराजमानराजसिंहासनोपान्तभूमण्डलः[1], भूमण्डलोदरविरोचमानप्रतापप्रभाकरमण्डलप्रभाप्रभावदूरितचराचरान्धकारः[2], अन्धकारातिरिव निर्भरसंवर्ध्यमानविनायकगणो महासेनातिशयप्रेमा खर्वितदर्पकदर्पो नागेन्द्रावतंसो भूतिभूषितश्च[3], हरिरिव निखिलसुरद्वेषिविद्रावणपणोऽनन्तालङ्करणदेहश्च[4], मनुरिव प्रियव्रत-सन्तानः, सगर इव रत्नाकरसम्भवातिविजृम्भमाणमानः, मान्धातेव सत्यालङ्कारः, रघुरिव विश्वजिदारम्भाडम्बरविस्मापितविश्वः[5], नल इव पुण्यश्लोकावतारो वैदर्भीमधुरव्याहारनिबद्धचेता निर्जितकलिप्रभावो निराकृत-पुष्करविष्कृताहितनिकरश्च, रन्तिदेव इव दुरन्तावग्रहदूनदीनार्थिसार्थजठरोषर्बुधनिर्वापणायानु[क्षणं] प्रत्यह-मन्नमयाखर्वोर्वीधरसहस्रविश्राणनव्रतो निरवधिमहारजतराशिवितरणदूरीकृतभूदेवदैन्यश्च[6], श्रीरामचन्द्र इव खण्डितखरदूषणप्रचारः, युधिष्ठिर इव धर्मावतारो भारतालङ्कारो विश्रुतकीर्तिचन्द्रसन्तानोऽनुक्षणमधिवर्धमानं धनञ्जयमालोक्य सुप्रीतमना[7] भीमसेना-

---

1. Ms. ०नो० 2. Ms ०वो० 3. Ms. ०द्वि० 4. Ms. ०ङ्क०
5. Ms. ०र्भा० 6. Ms. ०र्मवि० 7.Ms. ०ति०

सादितदिग्विजयश्च, ययातिरिव स्फुरदमलालङ्काररसमाधुर्य-[1]रीतिविद्यातिविद्योतमाननव्यकाव्यप्रसूतिसमालिङ्गितकण्ठः, भीष्म इव संवर्धितविचित्रवीर्यो नादेयश्च, कलानिधिरपि सम्पूर्णमण्डलो-[3]ऽप्यश्लेषाप्रियोऽपि न शशाङ्कः, विश्वो[द्यो]तनकरोऽपि कुमुदामोद-हरोऽपि पद्माह्लादकोऽपि तमोऽन्तकोऽपि न सप्ताश्वो न वा चण्ड-करः, निरुपमवज्रकोटिविसर्जनतर्जितनिखिलार्तमण्डलदुःखराशि-रपि विपक्षबलारातिरपि गुरुवचनमात्रसारोऽपि सततविहित-विविधाध्वरकलापदीक्षितोऽपि न संक्रन्दनो न वा गोत्रभिद् न वा शतमन्युः, जगत्प्राणतया समनुभूयमानोऽपि निरुपमपरिमलशैत्य-परम्पराप्यायितचराचरोऽपि न प्रभञ्जनो न वा सदागतिः, धन-दोऽपि राजराजोऽपि न कुबेरः, पुण्यजनाधीशोऽप्याशापालकोऽपि न नैर्ऋतः, सुनीतिरीतिसंवर्धितनिखिलवसुन्धरामण्डलोऽप्यनीति-राष्ट्रः, भुजगराजभोगभीषणभुवनकोषभूषणनिजभुजराजविराजमान-करालकरवालधाराधोरणिनिर्जितनिर्जरप्रतीपप्रतिमाशेषप्रतिपक्षपक्षः, निरन्तरहृदन्तरविराजमानश्रीमत्परदैवतचरणारविन्दद्वन्द्वप्रसादा-सादितनिरुपमपुरुषार्थसार्थसार्थकीकृतजनुः, अनुपमविविधगुणगण-सम्पादितविचित्रचमत्कारधाराचित्रितचराचरः, विचित्रसेनश्चित्र-सेनेतियुक्तार्थमेवाभिधानं समासादितवान् ॥ १ ॥

तथाहि

दूरादेव विलोक्य यस्य महतीं सेनामिवाक्षौहिणीं[4]
भूलोकाद्भुतदर्शनामपि वपुःकान्तिच्छटां सम्भ्रमात् ।
सेना वैरिमहीभुजामतितरां विस्तारभाजोऽप्यलं[5]
चित्रायन्त इतीरयन्ति कृतिनः श्रीचित्रसेनाह्वयम् ॥ १३ ॥

---

1. Ms. ०ना० 2. Ms. ०द्ये० 3. Ms. ०प्या० 4. Ms. ०विम्मोहिनीं
5. Ms. ०नं

यस्मिंश्च वसुन्धरापुरन्दरे वसुधामधिशासति पङ्काभिषङ्गः सनीरासु वसुन्धरासु, गदप्रसङ्गश्च यदुवंशविस्तारकथासु, वक्रता च चन्द्रकलाकाव्यकामिनीकटाक्षकेशपाशेषु, तरलता च सौदामिनीसमीरसैन्धवसीमन्तिनीनयनेषु, नखरदशनाभिघातविवर्धितनिर्दयद्वन्द्वविमर्दश्च सुरतसम्भोगाडम्बरेषु, करुणार्तस्वरसम्बलितमधुरालापश्च नववनितारतारम्भेषु, कुरङ्गाश्च विजनेषु, जाड्योन्मादौ च परदैवतचरणाम्बुजपरमपरिशीलनशीलेषु चतुरनागरीरतातिलोलेषु च, उद्वेगवार्ता च ताम्बूलास्वादननिरतेषु[1], चीत्कारनादश्च करितुरङ्गमेषु, मधुपानजनितमदान्धकारश्च मधुव्रतेषु, वञ्चकत्वञ्च फेरवेषु, विपक्षता च जीर्णशायकेषु पतत्रिपत्रेषु च, अनलङ्क[ा]रता च कुकविकाव्यप्रबन्धेषु, निरर्थता च ध्वनिमयशब्देषु, दण्डग्रहणं भिक्षाटनञ्च ब्रह्मचर्यतुर्याश्रमनिष्ठेषु, भ्रमणप्रयासश्च कुम्भकारचक्रतीर्थमज्जनार्थिवासरमणिवाजिराजिषु, करबन्धश्च विवाहेषु, अर्थिता च परदैवतप्रसादवस्तुविषयेषु, नैर्गुण्यं विहितनिषिद्धा[2]वहेलनञ्च पञ्चमाश्रमनिरतेषु, कठिनता च पाषाणायसकामिनीकुचकलसेषु, पुष्पवतीष्वासङ्गो लतास्वेव, मदिराख्यानञ्च खञ्जरीटेषु, परपुष्टता च कोकिलेषु, कारुण्यान्नृपालश्च श्रीरामायणसंहितेतिहासश्रवणरसिकेषु, सन्तापकता च हुताशभास्करयोः ॥ २ ॥

यश्च[3] लीलयैव भुजेन विश्वम्भरां निरन्तरमपि हृदयेन विश्वम्भरं विश्वम्भराभृतोऽपि स्वयमुपनतान्[4] कटाक्षमात्रेण बिभ्राणो भूधरैकधारणप्रयत्नप्रसारितभुजयुगलं विहितफणामण्ड[5]लसहस्रप्रयासश्च विहसतीव विश्वम्भरमनन्तरूपञ्च भगवन्तं नारायणम् ॥ ३ ॥

यश्च निरन्तरसमुपचीयमानरत्नसञ्चयतयाप्यतिगम्भीरतया निरन्तरतरङ्गोल्लासितमकरकेतनतया निर्वृतनिखिलग्राहकतया

---

1. Ms. ०खा० 2. Ms. ०वि० 3. Ms. ०स्य 4. Ms. ०न
5 Ms. ०न०

भोगीन्द्रनिवहलीनतया[1] निभृतान्तःसुखशायितचराचराधीश्वरतया स्फुरदनुपमरंह[:]संघातातिभीषणमहावाहिनीशतसहस्रसेव्यमानतया च विडम्बयतीव पारावारम् ॥ ४ ॥

अपि च

राजर्षिर्जनकः किमेष सनकः किंवाम्बरीषः स्वयं
प्रह्लादः किमसौ विराजति पुनर्वैरोचनिर्भूतले ।
इत्थं यत्र वितर्ककर्कशधियां वाचां प्रपञ्चो महान्
सोऽयं श्रीयुतचित्रसेनवसुधाधीशः समु[द्]द्योतते ॥ १४ ॥

अथवा

दुर्वासा न च कोऽपि कोपकुटिलो यस्याधिकारान्तरे
कस्तं वर्णयतां वदान्यतिलकं धीरोऽम्बरीषं नृपम् ।
यः स्वर्गागत इत्यशेषविदुषां निर्णीतिरु[द्]द्योतते
तस्मिन् कस्य विरोचनात्मजतया शङ्का समुन्मीलतु[2] ॥१५॥

यमुद्दिश्य च कस्यचित् कवेरियमुक्तिर्यथा— ॥५॥

मेरुद्वन्द्ववती विभाति जगती श्रीचित्रसेन त्वया
द्विर्भानुर्भवतः प्रतापमहसा कीर्त्या द्विचन्द्रा तव ।
रूपेण द्विमनोभवा चिरतरं त्वञ्जीवतादस्त्वियं[3]
कल्पद्मारुहभूषणा वसुमती कल्पाष्टरत्नाकरा ॥१६॥

अपि च

प्रासादा[:] प्रचुरार्कचन्द्रकिरणाः प्रोद्दामसिंहासना-
श्चञ्चच्चामरकेकिपिच्छपवनैर्व्याधूयमानान्तराः ।
श्रीखण्डागुरुरङ्कु[4]नाभितिलकैर्विभ्राजमानाङ्गना
बन्धूनां द्विषता[श्च] नोचितमिदं श्रीचित्रभूमीपतेः ॥१७॥

---

1. Ms. ०नि० 2. Ms. म० 3. Ms. ०मं 4. Ms. ०ङ्कु०

अपि च

गेहान्तः परिवादिनीगणमृदुव्याहारलीलाशतं
तानव्रातविलासि[नी-सु]निनदैर्लोला[:] कुरङ्गीदृशः ।
मातङ्गैश्च विमानराशिभवनैर्नित्यं जनैः सङ्कति-
श्चित्रं श्रीयुतचित्रसेननृपतेः साम्यं सुहृद्वैरिणोः ॥१८॥

किञ्च

राजंस्त्वत्क्रियमाणमन्वहमहो वीक्ष्यातिघोरन्तपो
भीताः स्वस्वपदाच्युतिभ्रमवशान्नाकौकसो ये पुरा ।
प्राचीना मलिना निरीक्ष्य तदनु स्वर्लोकसौधावलीः
कीर्त्या ते धवलीकृता मुदमतीवाभूतपूर्वां ययुः ॥१९

निःसंख्यैर्द्विजराजमित्रगुरुभिः काव्यैर्बुधैर्मङ्गलै-
र्युक्ता केतुमती सभा यदपि ते श्रीचित्रसेन प्रभो ।
नो जेतुं तदपि त्रिपिष्टपपतेः शक्ता सुधर्मामसौ
यत्रैवात्र तमो न वात्र घटते मन्दः कदाचिज्जनः ॥२०॥

वित्यं भीमधनञ्जय[ा]र्चनरता हीनाप्यपार्थाश्रया
कृष्णाख्यानपरा यमादिविविधव्यापारशुद्धोदया ।
मन्त्राधीश्वरवासुदेवरुचिरा दुःशासनद्वेषिणी
धीरश्रीयुतचित्रसेन किमियं यौधिष्ठिरी ते सभा ॥२१॥

तस्य च समस्ताशानितम्बिनीवदनपङ्केरुहमुद्राभञ्जनप्रबलप्रचण्ड-प्रतापचण्डकरमण्डलस्य, शरदिन्दुकुन्दसन्दोहमन्दाकिनीवारिधारा-नुकारिरुचिरयशोमण्डलीमण्डि[त]भूमण्डलस्य, कतिकतिपयमहा-मणिनिचयखचितकाञ्चनकवचकुण्डलादिमहामण्डनवितरणखण्ड-खण्डीकृतैककवचकुण्डलदानलब्धवर्णकर्णयशोमण्डलस्य, नि-खिलवसुन्धरानिर्जलस्थलनिर्मितमहापद्माकरावलोकनलोललोचनेन

1. Ms. ०व्रते० 2. Ms. ०च्यु० 3. Ms. सर्ल्लो० 4. Ms. ०व० 5. Ms. ०र:० 6. Ms. ०लो०

निदिद्रासुना सपद्मालयपद्मालयानाथेन पयःपारावारावधारणविधुरेणागत्य प्रीत्यतिशयकृतनिजालयाधिष्ठाननिष्ठस्य, प्रबलतरदुरन्तदारिद्र्याभिधानब्रह्मराक्षसोपद्रुतनानाजनपदागतजनगणपालनोपार्जितोर्जितयशोराशिनिर्जितैकविद्वङ्गममात्रत्रासत्राणाभिमानतरलतरशिविराजगर्वपर्वतस्य—॥६॥

प्रतिदिनन्दिननायकसारथौ
समुदिते सति सज्जलमज्जनम् ।
जयति वैदिकमप्यथ तान्त्रिकं
तदनु सान्ध्यविधानमपि द्वयम् ॥२२॥

तदनु मन्दरकन्दरसुन्दरोदरमुपेत्य सुधासितमन्दिरम् ।
रजतकाञ्चनभाजनसञ्चयैः शबलितं बलितं बलिवस्तुभिः ॥२३॥

वकुलवञ्जुलकेतककेतकीकमलकैरवचम्पकराशिभिः ।
कुरुव[कस्तवकैः सत्र]कैरभिस्फुरितसौरभभारमनोहरैः ॥२४॥

किञ्च विकचमुचुकुन्दकरवीरकाञ्चनकिंशुककदम्बकह्लारकोकनदकङ्केल्लिमालतीमधूकमाधवीपुन्नागनागकेशरयूथिकाजातीप्रमुखैः परस्परपरिस्पर्धमाननिजनिजपरिमलपरिपाटीभिश्चित्रमिव रूपं सौरभमपि विचित्रचित्र[म]रभमाणैः कुङ्कुमरङ्कुमदश्रीखण्डद्रवघनसारोशीरनीरदीप्यमानागुरुगुग्गुलुकलाङ्गधूपामोदनिवहैः कम्बुकदम्बविद्योतमानाष्टाङ्गार्घ्यवितानैः सुविनीतद्विजोपनीतनवनीतक्षीरदधिशर्करासारहृदयामोदकमोदकसुमृष्टमिष्टपिष्टकलड्डुकप्रायैरभिप्रायानुरूपैस्त्रिपञ्चाशत्संख्यकैः संख्यावदुर्वीसु[प]र्वाहारनिर्वाहकैरुपहारैर्हेमासनाभरणसोत्तरीयाम्बरद्वन्द्वाभ्याञ्च, विहितवैष्णवाचमनः, विधाय सामान्यार्घ्यम्, अभ्यर्च्य द्वारदेवताः, प्रणम्य गुरुपरम्परां,

1. Ms. ०द्रा० 2. Ms. ०सा० 3. Ms. ०र्व० 4. Ms. ०न० 5. Ms. ०च० 6. Ms. ०व० 7. Ms. ०के 8. Ms. ०र्वा० 9. Ms. repeats धाय after विधाय

विधाय भूतशुद्धिं, निर्वाह्य[1] प्राणप्रतिष्ठां, विन्यस्यान्तर्बहिःसंहार-मातृकाष्टत्रिंशत्पञ्चाशत्कलाः, केशवादिमातृकाः श्रीकण्ठादीन् केशव-कीर्त्यादींस्तद[न्य]न्यासञ्च विधाय, कृतप्राणायामः, विन्यस्य पीठम्, ऋष्यादिमन्त्रपदान्यपि प्रदर्श्य, मुद्रारचितमूर्तिपञ्जरकिरीटे-न्द्रियव्यापकन्यासः, ध्यात्वा, संस्थाप्य विशेषार्घ्यम्, अन्तर्यजन-मारभते । [७]

तथाहि

चन्द्रार्ककान्तनवविद्रुमपद्मराग-
गोमेदहीरकहरिन्मणिपुष्परागैः ।
नव्येन्द्रनीलमणिभी रजतोत्करैश्च
दीप्तैर्महामरकतैरपि काञ्चनैश्च ॥२५॥

श्रीचिन्तामणिसञ्चयेन च महाप्रासादवप्रावलीं
निर्मायापि च कल्पवल्लिनिकरैः कुञ्जावलीं कामपि ।
तत्राप्युज्ज्वलतत्त्व[दु]द्भटमहारत्नोत्करैरद्भुतां[3]
पर्यङ्कावलिमूर्ध्वमौक्तिकमणिस्तोमोल्लसत्तोरणाम् ॥२६॥

तत्रारोप्य विसर्पिकान्तिलहरीसञ्चारिसौदामिनी-
शोभाविष्कृतदीप्तिदीपितदिशं कादम्बिनीं कामपि ।
निर्मायोज्ज्वलरत्नसञ्चयमयान्मञ्जीरहारोत्करैः[4]
केयूरोरुकिरीटकङ्कणमुखांस्तैरेव सम्भूषयन् ॥२७॥

वासोद्वन्द्वममन्दकाञ्चननिभं चित्रञ्च चित्रप्रभं
दत्त्वा चिन्तनयोपकल्प्य रुचिरं स्वादूपहारोत्करम्[5] ।
भक्त्या पूजयति स्तवीति विविधैः स्तोत्रैः पुराणागम-
प्रोक्तैः श्रोत्ररसायनैः श्रुतिमयैर्नव्यैः स्वकीयैरपि ॥२८॥

---

1. Ms. ०क्त्य 2. Ms. ०ञ्च 3, 4. Ms. ०ज्व० 5. Ms. त्वा

ततश्च पूजाप्रासादतो[1] निर्याय स्फु[र]दखण्डश्रीखण्डद्रवार्द्र-श्रीतरुपलाशसञ्चयदीप्यमानशालनिर्याससघृतगुग्गुल्व[2]गुरुगुरुसौरभ-सम्भारभरितहरिदन्तरं, क्वचिद्रुद्राध्यायाध्ययनशीलैः क्वचन त्र्यम्बक-मनुपठनपुरस्सरमनर्गलममरकल्लोलिनीसलिलधारानिर्वाह्यमानशङ्करा-भिषेकैः क्वचिच्च नारायणकवचरासपञ्चाध्यायीसमध्ययनपरैः क्वचिदेकदन्तस्तुतिसमुच्चरनिरतैः क्वचिच्च कुसुमदन्तगन्धर्वो-दीरितस्तुतिगाथागाथनिरतैः[3] क्वचन नीलकण्ठस्तवसमुत्कीर्तना-कुण्ठैः क्वचन शैलपुत्रीमाहात्म्यसप्तशतीपारायणनिपुणैर्विभ्राज-मानं, पूर्वपुरुषप्रतिष्ठितम्, अखण्डपुरुषार्थप्रसादम्, अन्तरा महा-प्र[ा]सादवरं, महाप्रसादमयं भगवन्तं खण्डचन्द्रावतंसं लिङ्गमयं खण्डपरशुं प्रणम्याभ्यर्च्य प्रसूनाञ्जलिभिः, अभिवाद्य च श्रीगुरु-चरणं, गङ्गाभिधानां गामाकार्यात ॥८॥

ततश्च स[ा]

तद्वचःश्रवणजातसंमदा
चारुपक्वफलभारलोभतः ।
धावति क्षितिपतिं प्रति द्रुतं
कामधेनुरिव कल्पपादपम् ॥२६॥

तां सन्तर्प्य फलैः प्रदक्षिणमथो तस्या विधायादरा-
त्तत्पुच्छेन निजाङ्गसञ्चयमहानीराजनम्भक्तितः ।
नत्वा ताञ्च सुभोज्यराशिमतुलं दत्त्वा द्विजाय स्वय-[5]
म्[6]भुङ्क्ते बन्धुजनैर्निवेदितमतिश्रद्धेयमन्नादिकम् ॥३०॥

तस्य राज्ञो निखिलराज्यसम्भारसंरक्षणावेक्षणविविधमन्त्रतन्त्र-सञ्चारचारुचातुर्यधुर्यचक्रचूडामणिः[7], अतुलषाड्गुण्यप्रमुखसाद्गुण्य-

---

1. Ms. ०प्रमा० 2. Ms. ०लु० 3. Ms. ०द० 4. Ms. क० 5. Ms. ०त्वा 6. Ms. ०म्भुक्ते 7. Ms. ०क्रे०

परम्परापराभावितपुरुहूतपुरोहितप्रभावः, निरवद्यगद्यपद्यमय-विविधप्रबन्धचयनव्यातिदिव्यकाव्यमाधुरीभरचमत्कारसारचुम्बन-चटुलचारुचञ्चरीकवरचातुरीभरमनोहरः, निखिलरसभाजनप्रचुर-सभाजनसभाजनभुजदण्डोद्दण्डकोदण्डमण्डलविनिःसरदकाण्डप्र-चण्डप्रकाण्डकाण्डमण्डलीखण्डखण्डीकृतारातिमहीमण्डलाधिपति-मुण्डमण्डलीमण्डितमहीमण्डलः, अर्बुदार्बुदारोहाखर्वपर्वतायमान-दुर्वारवारणबलबहलप्रलयजलधिकल्लोलचयभीषणप्रचुरवर्मचर्मसञ्चय-सञ्चारकरालकरवालकठोरकरमण्डलप्रचुरचण्डपदातिपदाहति-समुच्छलदुद्बहलरजःपुञ्जपिञ्जरितहरिदम्बरः,निरन्तरनिरुपमचिन्ता-मणिदामनियमितदेदीप्यमानमानसमन्दिरोदरजरीजृम्भ्यमाणश्रीमत्-सीतासौमित्रिसमीरसूनुसमेतसनीर[नीर]ददूर्वादलश्यामलकलेवर-श्रीमद्राजराजेश्वरस्फुरदशरण[शरण]चरणसरोजराजविराजमाननख-रचन्द्रकलापचन्द्रिकाचयचुम्बनचतुरचेतश्चकोरवरः,तत्प्रसादासा-दितपरमपुरुषार्थसार्थसार्थकीकृतजनुः, अनुपमनर्तनप्रवर्तमानकीर्ति-नर्तकीनर्तनचत्वरीकृतचराचरः, निजकुलकुमुदकाननविकाशनामन्द-चन्द्रः, श्रीमाणिक्यचन्द्रो नाम ॥६॥

तथाहि

पूस्तेषां कनकप्रवालखचिता सौधावली शैलजा-
क्रान्ताप्यच्युतनीलकण्ठवसतिः सोमार्कविम्बोज्ज्वला ।
नागेन्द्रैर्विलसन्महामणिवरैर्विद्योतमाना क्षणं
येषु स्यादरुणञ्च वा सकरुणं माणिक्यचन्द्रेक्षणम् ॥३१॥

अपि च

अम्भोजीयति वैरिवामनयनानेत्रं चकोरीयति
प्राज्ञानां नयनं खलौघहृदयं शीतांशुकान्तीयति ।
श्रीरामाङ्घ्रिसरोजभक्तिरतुला राकाविशेषीयति
ध्वान्तीयत्यरिवीरसैनिकघटा माणिक्यचन्द्रोदये ॥३२॥

---

1. Ms. ०द्र रा० 2. Ms. ०त्त० 3. Ms. ०ज्व०

यमालम्ब्य च कस्यचित् कवेरियमुक्तिर्यथा—

रे विद्या विविधाः कलाश्च सकलाः सङ्गीतनृत्यादयो
रे वैदग्धविलासदेवि कविते धीराः कवीनां वराः ।
ब्रूत ब्रूत कथं कुतः क्व नु भवेद्विश्रान्तिलेशोऽद्य वः
श्रीमान् विज्ञशिरोमणिः क्षितितले माणिक्यचन्द्रो न चेत्[1] ॥३३॥

तेन चैवंविधसद्गुणपरम्परया परया च मत्या पराक्रान्त्या कान्त्या च क्षान्त्या रञ्जितप्रकृतिसमाजेन, वृत्रजिदिव चित्र[शि]खण्डिजेन, चित्रसेनो विश्वम्भरां बभार ॥११॥

इत्थमतिविराजमाने रञ्जितप्रकृतिसमाजे महाराजाधिराजे, त्रिनयननयनवेदयोगाङ्गयुगसंख्याकेषु समतीतेषु[2] तुर्ययुगहायनेषु[3], वेदाङ्गषणमुखमुखसोमसम्मितासु[4] समतीतासु च शकभूपालसमासु, प्रथमराशिमध्यसञ्चारलीलाशालिनि भगवति मरीचिमालिनि, अकालमहाप्रलयमहाजलधरव्यूह इव संवर्तप्रवर्तमानप्रचण्डप्रवाहोद्वहमहाप्रभञ्जनसञ्चयसञ्चार्यमाणः, संजृम्भमयन्निव मध्यन्दिनदिननायकरोहिणीरमणयोरप्यन्धीकरणमन्धकारनिकरं[6], तमोमय इव तमालतरुमय इव रजोमय इव रजनीचरचमूचक्रमय इव कलिकालकलितकठोरकल्मषकलापमय इव कृपाकृपणकृपाणपाणिगर्भवत्यर्भकदैवतद्विजदूनदीनदारणदारुणपणः सर्वसर्वस्वापहरणस्वेच्छाविहरणप्रतिषिद्धाचरणमात्रनिपुणः प्रबलबलबहलहलहलकोलाहलहेषाघूंहितिचीत्कृतिभेरीभाङ्कृतिघन्टाटङ्कृतिखड्गझङ्कृतिवीरहुङ्कृतिसिंहनादभूरिभैरवरवनिवहभरितभूमण्डलो महाराष्ट्रमहीन्द्रसाहूराजचमूसमूहोऽप्यकाण्ड एवाकाण्डकोदण्डः खण्डप्रलयं विधित्सुरिव प्रचण्डशीलो गौडजनपदजनगणसमुन्मूलनहेतुर्महाधूमकेतुरिव समुत्तस्थौ[7] ॥१२॥

---

1. Ms चे० 2. Ms. ०व्यु 3. Ms. ०व्यु 4. Ms. ०स्मि० 5. Ms.०ञ्जम० 6. Ms. has one redundant र after नायक 7. Ms. समुत्तत्स्थौ

यान्त्येकेन दिनेन योजनशतं हीनाख्रदीनान् स्त्रियो
बालान् घ्नन्ति हरन्ति वित्तमखिलं साध्वीश्च सीमन्तिनीः ।
संग्रामे समुपस्थिते सुनिभृतं देशान्तरे सुद्रुतं
धावन्त्यद्भुतवेगवाजिनिवहो येषां प्रधानं बलम् ॥३४

एवमादिविश्रुतस्वरूपचारित्रः[1] संमिलित एष महान् निसर्गदुर्गमो वर्गिवर्गाणां सैन्यसागर इति निसर्गभीरुभावभङ्गुराणां गौडजनपदप्रकृतीनां किं कर्तव्यं, क्व गन्तव्यं, क्व स्थातव्यं, क उपायः, कः सहाय इति, देव किमिदमनुष्ठितमतिनिष्ठुरमिति च दिशि दिश्यकाण्डप्रचण्डवज्राभिघातखण्ड्यमानगण्डशैलमण्डलचण्डरणित-
जृम्भित[2] इव मन्दरमन्दरमहीधरोद्दाममन्थनामर्दान्दोलिताम्भोराशिमहाम्भोनिवहबहलकल्लोलानिकरसञ्जनित[3] इव सम्पूरयन्नाशाविवरमपि रोदसीकन्दरोदरं दूरितशब्दान्तरग्रहणावसरो[4] बभूव सुमहान् कोलाहलः ॥१३॥

ततश्च शकटशिविकास्तम्बेरमतुरङ्गमतरणि[भि]श्चंक्रम्यमाणैश्च क्रमेलकचक्रैरक्रममाक्रामद्भिराचामद्भिरिवाशाचक्रवालं धनजनभारमन्थरसञ्चारैरतिविस्तारैर्धावतां महाधनानां, गृहीतगृहसाराम्बरभूषणभाजनानामङ्कावलम्बितलम्बालकलोलबालकानां ग्रीवावलम्बितशालग्रामशिलानां दुर्वहमहाभारविविधशास्त्रपुस्तकसञ्चयापचयचिन्तासन्तापज्वरजर्जराणां[6] भूमिनिर्जराणां, दुर्वहगर्भभारमन्थराणां नितम्बविम्बकुचकुम्भद्वन्द्वभारालसानाञ्च पङ्कसङ्कटकुशकाशकण्टकाङ्कुरशङ्कया पदे पदे स्फुरितातङ्कानां निदाघसमयसमेधमानमध्यन्दिननिदाघदीधिति[दीधिति][7]व्राततीव्रतापप्रतापमसहमानानां यथासमयममिलितपानाहारतया क्षुत्तृड्[8]व्याकुलितार्भकरोदनार्तव्याहारकातरहृदयानां प्रमदानां करुणार्तपरिदेवितरुदितैर्व्याकुलानां

---

1. Ms. ञ्यः 2. Ms. ०जमि० 3. Ms. ०न्दो० 4. Ms. ०ञ्जि०
5. Ms. ०नम्बानक० 6. Ms. ०स० 7. Ms. ०व्रते० 8. Ms. ०तृ०

वर्गिवर्गमयमिव निखिलसर्गमनुभवन्तीनाञ्च, विविधार्तनादेन मिथोऽनुवादेन च क्षुभितमिव क्षमामण्डलमभवत् ॥१४॥

तथाहि

पद्मानामहमेव बान्धव इति ख्यातं त्रिलोकीतले
किं नैतानि मुखाम्बुजानि कुलजावृन्दस्य दृष्टान्यपि ।
इत्थं खेदवशात् सहस्रगणितैस्तीव्रैः करैरेकदा
तान्याकर्षति निश्चितं प्रकुपितः श्रीमान् दिनाधीश्वरः ॥३५॥

एतस्मिन्नेवावसरे महता चमूसमूहेन सचिवसमाजाधिराजं वर्धमाननगरमधिसंस्थाप्य महाराजः, समस्ताशाचक्राक्रामिणा महाविक्रमशालिना बृहता बलव्यूहेनाच्छाद्य भूमिवलयम्, अनन्यपरायणः शरणागतकरुणास्पददरिद्रद्विजगणभूयिष्ठम्प्रजासमूहमशातभयसञ्चारं संस्थापयितुम्, अभिनवनिजाधिकारदक्षिणप्रयागगङ्गासागरसम्भेदमयतीर्थद्वयाभ्यन्तरालमहीवलयमण्डनायमानां विशालां नाम विशालां नगरीमाजगाम ॥१५॥

तत्राप्यागत्य विविधवसुराशिवितरणसङ्कल्पकल्पनाभि[:] कल्पद्रुमकल्पोऽनल्पद्रविणदानदूरितदारिद्र्यदावानलो द्युनदीप्रवाहावगाहनद्वैमातुरदामोदरदुर्गाद्युमणिदर्पकारिदीर्घार्चनवीतिहोत्रब्राह्मणसन्तर्पणवाञ्छितार्थार्पणजन्यागण्यपुण्यपुञ्जसञ्चारचारुतरीकृतचराचरः सञ्चरमाणचारणचयोच्चरितचर्चरीध्वनिचयसंवर्ध्यमानधन्यधन्यध्वनिरतुलतुलामहाचलजनितकीर्तिकर्पूरपरिपूरितब्रह्माण्डभाण्डोदरो विस्मापितनृगनहुषययातिमान्धातृधुन्धुमाररन्तिदेवशान्तनुप्रमुखवसुन्धराधुरन्धरविचित्रचारित्रराशिः, मनःशैल इव सौरभसम्भारैः,

---

1. Ms. ०स्व० 2. Ms. बन्धेव 3 Ms. ०व वा० 4. Ms. ०ङ्ग० 5. Ms. has one redundant उ before भय 6. Ms. ०र्णि० 7. Ms. ०ङ्च० 8. Ms. ०ध० 9. Ms. ०च्छले० 10. Ms. ०न्दु०

श्रीरामविश्रामैकाश्रमतया पादच्छायाश्वासितोपान्तभूभृन्मण्डलतया च महेन्द्राचल इव महीमहेन्द्रः सर्वाशापरिपालकोऽपि कियन्तमनेहसं विशेषतो दक्षिणाशाम्परिपूरयन्नवतस्थे ॥१६॥

तथाहि

क्षौणीन्द्रे चित्रसेने निजबलनिवहैर्दक्षिणाशावतंसे
शङ्के शङ्काकुलं वा विगलितमहिमा न्यस्तदण्डो बभूव ।
कुम्भोद्भूतेन सार्धं प्रचुरमपि तपः संविधास्यन् सुघोरं
युक्तार्थं धर्मराजाह्वयमयमधुना कर्तुकामो यमोऽपि ॥३६॥

एकदा तु तत्रैव विहितवासरविधेयपारलौकिकैहिकविविधवैधाचरणपरम्परे महीमहेश्वरे, हिण्डीरपिण्डमयमिव पुण्डरीकमण्डलमयमिव कर्पूरपूरपरिपूरितमिव द्रवितकलधौतमयमिव मथ्यमानक्षीरोदार्णव[नव]नीतपुञ्जमयमिव स्फटिकमयमिव पारदरसधारासारमयमिव नारदमुनिकायव्यूहमयमिव शारदाकलेवरकान्तिच्छटाच्छुरितमिव सङ्कर्षणशरीरसञ्चयसञ्चरितरोचिराजिरञ्जितमिव शेषाङ्ग[ग]लितकान्तिसन्तानसन्ततमिव चराचरं विरचयन्, तनुकिरणतन्तुसन्तानसम्पादितमिव पाण्डराम्बरमतिविस्फारमतिविस्तारयंस्त्रैलोक्यलक्ष्म्याः, राकाशुभ्रांशुमण्डलः प्रादुरासीत् ॥१७॥

प्रेमोज्जृम्भिततत्तदुज्ज्वलमहावस्तूनि यन्निह्नुते
दृष्टिं लुम्पति सन्दुनोति दयितं मानान्धकारो महान् ।
चण्डांशोरपि दुर्निवारमहिमा सोऽयं विधोरुद्यमे
नाशं याति बिभर्ति मूर्धनि कलां तेनास्य शङ्के शिवः ॥३७॥

---

1. Ms. ०च्छा० 2. Ms. ०मि० 3. Ms. ०भू० 4. Ms. ०लां
5. Ms ०णि० 6. Ms. ०च्छु० 7. Ms. ०छु० 8. Ms. ०ञ्ज०
9. Ms. ०चर० 10. Ms. has one redundant व after विस्तार
11. Ms. ०जृ० 12. Ms. ०ज्व० 13. Ms. ०धौ०

गम्भीराणि महामहोर्मितरलप्रारम्भसम्भीषणा-
न्युद्दामोत्कलिकाकलापरिसमावर्तान्यपाराण्यपि ।
मन्ये मानवतीमनांसि जलधे रूपाणि यत् सम्भ्रमा-
दत्युच्चैस्तरलीभवन्ति सहसा शुभ्रांशुविम्बोदये ॥३८॥

एतत् प्रोषितसुन्दरीजनगणप्राणान् महामानिनी-
मानान् दारयितुं विधूपरि महाधारोग्रचक्रम्पुरः ।
धत्ते पञ्चशरो विदारितमहामानौघपान्थप्रिया-
प्राणत्वेन तदीयशोणितचयैस्ताम्रं समुद्वीक्ष्यते ॥३९॥

पूर्वाशामुखविम्बचुम्बिनि कलानाथे समुद्यत्करे-
णोच्चैरम्बरमामृशत्यतितरां मानं प्रतीची दधौ ।
ताम्रीभूतदिनेशविम्बवदना तारोत्करव्याजतो
मन्ये मुञ्चति वाष्पविन्दुनिकरं व्योमाङ्गने सर्वतः ॥४०॥

शङ्के शङ्करभालनेत्रवहनज्वालाभिसम्पादितो-
ऽङ्गारोऽयं ज्वलितोऽस्य पश्यत कणांस्तारामिषान् सर्वतः ।
अन्तर्धूमशिखा यदस्य लभते निर्धूमतामद्य चेत्
संहर्ता जगतीं किमार्ततरुणीप्राणाञ्च चायं विधुः ॥४१॥

एष व्योमसरोविहारकुतुकी संलग्नतच्छैवला-
क्रान्तकोडतलोऽभ्युदेति पुरतो हंसो हिमांशूपधिः ।
मन्ये प्रोषितपद्मिनीसमुदयग्रासायमानो लसत्-
क्षीरोदाम्बुनिधेः समग्रपयसां पानाशया धावति ॥४२॥

इत्थमनेकविधानि नानानीवृन्निवासिमहाराजसंवर्धितकवीन्द्र-
वृन्दभणि[त]कवितावितानानि प्रादुरासन् ॥१८॥

---

1. Ms. ०णी० 2. Ms. ०ङ्गा० 3. Ms. ०लान्ता० 4. Ms. ०त०
5. Ms. ०न्ता० 6. Ms. ०नो 7. Ms. ल्ल० 8. Ms. ०धै:

ततश्च

आक्रान्ता मधुपोत्करेण[1] मलिना व्यक्तप्रसूनोदयाः
स्वालिङ्गन् चपलो बला[त्][2] कुमुदिनीस्तासां रजोराजितः[3]।
कावेरीकृतमज्जनोऽपि शनकैः किं लज्जमानोऽधुना
स्नातुन्दिव्यधुनीमुपैति पवनः श्रीखण्डशैलालयः ॥४३॥

एवंविधबहुविधकाव्यकलाकलापालापसमुन्मीलितरससागरावगाहनान्दोलनतन्माधुरीविशेषलेशसमास्वादमेदुरान्तःकरणकरणोवेलानिवेदकावेदितसार्धैकयामयामिनीभागो भूपतिरास्थानभवना[4]दुत्तस्थौ[5] ॥१६॥

अथ चलति नरपतिचक्रचूडामणौ, प्रणमन[6]व्यग्रभुजानाम्भूभुजाम्भुजानां स्फुर[7]दुरुमणिमण्डनमयमहामण्डनानां तदानीन्तनं भरमतिदुर्वहमसहमानानाम्पातालादिवोत्तिष्ठताम्भुजगराजमहाभोगानामन्योन्यसङ्कटसंघट्टझनझनायमानानां केयूरहारमणीनां निनादेनप्रणतजनसमाजनतिनामधेयसमावेदकानां प्रत्येकाख्यानाख्यापन[8]प्रणमनविज्ञापनवचनकोलाहलेन, मङ्गलपाठनिरतानाञ्च सूतमागधवन्दिवृन्दानामानन्दसन्दर्भनिस्यन्दिनान्दीनादसन्दोहेन,प्रोत्सारण[9]धिकारनिरतानाञ्च वेत्रलतावनामुच्चैः समन्तात् पश्यतेति निस्वनेन, प्रोत्सार्यमाणानाञ्च निजनिजाभिवादनवेदनव्याकुलानां बहलहलहलायमानगम्भीरनि[10]स्वनेन, तत्समाहूतानाञ्च भवनसारसकलहंसकोकिल[11]कलकण्ठनीलकण्ठानां सुविकलकलकलबहलकोलाहलेनसुभटानाञ्च विकटचर्मवर्मकृपाणधारिणां मिथो निर्दमविमर्दठनठन[12]यमानविविधायुधध्वानेन, देदीप्यमानविमलकलधौतमयाधारदीपितानां दीपशिखासहस्राणां नरराज[13]सभाजनार्थमागतानां मेरुशि-

1. Ms. ०नाः 2. Ms. वना० 3. Ms. ०ज० 4. Ms. ०न्थाना०
5. Ms. ०मु० 6. Ms. ०न्० 7. Ms. ०रु० 8. Ms. ०श
9. 10. Ms. ०निः० 11. Ms. ०कनककण्ठ० 12. Ms. ०ड
13. Ms. ०सभासंजनार्थ०

राणामिव ज्वलन्महौषधीनां[1] धगधगायमानध्वनितेन, सव्याजसञ्चार-चारुचतुरवाराङ्गनासमाजसञ्चारसञ्चलितकाञ्चीकिरीटकेयूरकङ्कण-कण्ठहारकटकमञ्जीरमण्डलीनां मञ्जुतरतारझङ्कारेण, शान्त्यधिकार-निरता[ना]ञ्च वेदविदुषामग्रजन्मनाम्प्रातःपदपुरस्कृतमङ्गलाशीर्वचन-विस्तारहारिव्याहारेण, तारमृदङ्गमुरजमर्दलझल्लशङ्खपटुपटहपटल[2]-भूरिभेरीभैरव[रव]निवहजनितकोणाघातविशेषेण, निराकृतेतरशब्द-सञ्चारणसत्वरचत्वरतलनिर्दयद्रुतविद्रुतचरणशतसहस्राजस्रसञ्चरण-गम्भीरभैरवरवनिकरैर्भरितहरिदम्बरैरापूर्यत रोदसीविवरम् ॥२०

ततश्च विसर्जितसकलराजलोकसमाजः प्रतीहारीनिर्दिश्यमान-सरणिरवनीपतिः शयनमन्दिरमाजगाम ॥२१॥

तत्र च मृगमदमलयजोशीरकाश्मीरागुरुगुग्गुलुगुरुसौरभसम्भार[4]-जरीजृम्भ्यमाणबहलधूपावलिपरिमलपूरपूरिताभ्यन्तरविवरे[5] कुमुद-कुन्दकम्बुकर्पूरचन्द्रचन्दनद्रवसम्मुग्धदुग्धफेनकल्पन्तल्पमारुह्य नि-बद्धपद्मासनो[6][7] विदलितविषमविषयवासनो झटिति तत्कालकलित-परमनिर्वेदहेति[ं] धारयामास । नातिदीर्घदुरन्तपाशसंयमनादुन्मोच्य[8][9] मनोवृत्तिं, निरस्य चास्याः प्रपञ्चमयमहागहनसञ्चारचातुरी[ं], मूलाधारचक्राधिष्ठितलिङ्गालम्बितसार्धत्रिवलयाकृतिमतितनीयसीं[10] प्रसुप्तां कुण्डलिनीमिव कुलकुण्डलिनीं मरुज्ज्वलनबीजभावनाविभा-[11]वितपावकसन्तापसन्तापितचेतनामुत्थाप्य,षट्चक्रभेदनक्रमेण सहस्रा-रमहासरोरुहकर्णिकारनिकेतनस्वाभीष्टपरदैवतेन संयोज्य, ताभ्याञ्च गुरुदैवतात्मनोरभेदमाकलय्य[12], निरुपमपरमध्यानावधानैकतानमानसो मानसोपनीतरुचिरोपचारपरम्पराभिः किमपि कमनीयमद्वन्द्वं चरण-सरोजद्वन्द्वं सानन्दं सभाजयन्[13], तादृशजपनहवनस्तवनतर्पण[14]स्वार्पण[15]-

1. Ms. ०नं 2. Ms. ०ङ्ग० 3. Ms. ०के० 4. Ms. ०म्भी०
5. Ms. ०म्भ० 6. Ms. ०भ्या० 7. Ms. ०ग्ध० 8. Ms. ०ना
9. Ms. ता० 10. Ms. माना० 11. Ms. ०ज्ज्व० 12. Ms. ०नच्य
13. Ms. ०नय 14. Ms. ०सर्पणो० 15. Ms. ०आ०

प्रदक्षिणभ्रमणप्रणमनानि विधा[य], तथैव पूजिततच्चरणसरोजतल-व्यतिकरजनितानन्दभरकलितविपुलपुलककदम्बतया[1] तदुपरि च कदम्बकुसुमायमानशिराः सुष्वाप ॥२२॥

प्रसुप्तश्च मृगयाविहारोद्योगिनमात्मानं ददर्श ॥२३॥

ततश्च सादिभिराकृष्यमाणानां व्यग्राग्रखुरद्वन्द्वाभिघातक्षुण्ण-क्ष्मातलानां निरर्गलं बहलफेनस्तोमस्रुतिमतां[2] विचित्राम्बरभूरि-भूषणानां हेषतां मुहुर्मुहुरुत्पततां विहङ्गमानामिव तुरङ्गमाणां[3] क्वचन सङ्कर्षणसरस्वतीशेषसुरसिन्धुसुधाचन्द्रचन्दनकर्पूरपूरकम्बुकादम्ब-दन्तावलदन्तकुन्दकुमुदकेतकहिरण्डीरपिण्डपुण्डरीकषण्डपरिपाण्डराः क्वचनेन्दीवरमहेन्द्रनीलमरकतमहामेघमेदुरमनोहरच्छायाः[4] क्वचन नवीनपद्मबान्धवपद्मरागपलाशपुष्पप्रवालपल्लवप्रायाः सन्तत-सन्ताड्यमानभेरीपटहपटुघोषमांसलश्रृङ्गशङ्खादिनिनादाकर्णनजनित-रोषावेशातिचञ्चलीकृताः[5] पृथक् पृथक् पङ्क्तीर्[6]ददर्श। क्वचिदुपरि-विराजमानपटमण्डपा[:] सेन्द्रायुधसौदामिनीसमुदयशोभमान-सान्ध्यमहामेघनिवहविराजमानशिखरा इव महामहीधरपरम्परा आ-धोरणनिपात्यमानाङ्कुशा महादन्ता दन्तावलपङ्क्ती[7]:, क्वचन निरन्त[र]-मुच्छ्वसतीर्[8]हसन्तीरिव विस्फारितवदना[9] लिहतीरिव[10] लोली-कृतरसना: क्षुरखरदशना अतिकृशतया दृश्यमानास्थिपञ्जरा इव नखराभिघातविदारितवसुन्धरा घर्घरघोरघंनघूत्कारगर्जित[तर्जित]-निखिलजन्तुसन्तानाः[11] सारमेयपङ्क्तीः[12], क्वचनाजिनपिहितचरणनेत्रा विचित्रगात्राः[13] पादातपाणितलनिहिताः श्येनप्रमुखमृगयोपयुक्तपत्रि-पङ्क्तीः[14], क्वचन पूर्णकार्मुकायमाणकण्ठा विविधवादित्रवागुरापाश-

1. Ms. त 2. Ms. ०स्वत० 3. Ms. ०ला 4. Ms. ०छा०
5. Ms. ०मासन० 6. Ms. पंक्ती 7. Ms. पंक्तीः 8. Ms. ०मुछ्वसन्ती
9. Ms. ०ना: 10. Ms. नि० 11. Ms. ०घ्यु० 12. Ms. ०पंक्तीः
13. Ms. ०त्र० 14. Ms. पंक्तीः

प्रमुखमृगयोचितवस्तुस्तोमातिभारमन्थरगतीश्चङ्क्रम्यमाणाः क्रमेलकपङ्क्तीर्ददर्श ॥२५॥

क्षणेन च चर्ममयमिवाम्बरतलं खड्गलतामयमिव दिग्वलयं तुरङ्गमयमिव भूमण्डलं रजोमयमिव रोदसीविवरं हेषितबृंहितचीत्कृतिघन्टाटङ्कृतिसिंहनादसहितबलबहलकोलाहलमूर्छितप्रायम्भुवनमण्डलमनुबभूव ॥२६॥

अनन्तरञ्च

एते यान्ति किमम्बरे किमथवा भूमावपि क्ष्मापते-
रश्वा इत्थमशेषलोकभणितान्याकर्ण्य किं वाजिनः ।
विस्पष्टाखिलदन्तपङ्क्ति जहसुः प्रोच्चैः खुरोत्थं रजो-
राशिं व्योमचरं यदूर्ध्ववदनाः सन्दर्शयन्तः स्थिताः ॥४४॥

चेतोऽतीन्द्रियमप्यसौ मरुदहो नेत्राध्वदूरङ्गतः
किं सिन्धोरपि लङ्घनेन यदसौ शाखामृगैर्लङ्घितः ।
यज्जल्पन्त्यपि सैन्धवेति किल नो नामेति सञ्चिन्त्य किं
प्रो[त्]प्लुत्यापि सखेदमेव तुरगाः क्षान्त्या निवृत्तिं ययुः ॥४५॥

सप्तैव द्युमणेर्हया नियमिता व्यालैस्तथा चालिता
यन्त्रा निश्चरणेन वक्रगतयः किन्तैर्जितैर्मादृश[ा]म् ।
ब्रह्माण्डन्तु विभेद वामननखः किन्तेन भिन्नन वा
प्रो[त्]प्लुत्येति निवर्तते नरपतेर्मन्ये हयानाञ्च[यः] ॥४६॥

विश्वाशाप्रतिपालकस्य यदमी वाहा वयम्भूपते-
राशालङ्घनमप्ययुक्तमयशोबीजम्भवेन्मादृशाम् ।

---

1. Ms. ०पंक्ती 2. Ms. ०स्व० 3. Ms. पंक्ति 4. Ms. ०थाः
5. Ms. ते० 6. Ms. ०न 7. Ms. द्यमणेइमा 8. Ms. ०नि०
9. Ms. ०मु० 10. Ms. ऽस्मा०

इत्थं निश्चितचेतसोऽतिमहतः खेदाद्विकृत्याननाः[1]
न्याक्षेपेण समालिखन्ति वसुधां निन्दन्ति मन्ये विधिम् ॥४७॥

इत्थमनेकविधविबुधकविनिवहा महाराजपरिजनभूताः समुदाचरन्ति स्म ।२७

ततश्च नानाविधसेनाव्यूहैर्विरचितविविधव्यूहैश्चित्रसेनत्वमस्याधारोक्षतामुपनिन्ये ॥२८॥

ततश्च चन्दनचूर्णचामरचयचालनलाजमोदकदूर्वाक्षतविक्षेपप्रस्तरसुमधुरमङ्गलाशीर्वचनपुरस्कृतो वसुन्धरावृन्दारकवृन्दाभिनन्द्यमानदिग्विजयो महामात्रोपनीतमुपरिविरचितातिमात्रमहार्हदुकूलाम्बरमयमहामन्दिरं पुरन्दर इव मन्दरं महाधरेन्द्रो[2] महामातङ्गमारुरोह ॥२९॥

क्षणेन च प्रलयकालविजृम्भमाणमहा[जल]निधिनिवहबहलकल्लोलपरम्परा इव प्रचण्डझञ्झाप्रभञ्जनप्रेर्यमाणपुष्करावर्तकमुखसंवर्त[वर्त]मानमहाम्भोवाहना इव प्रच्छाद्य समन्ततो वसुन्धरां नैर्भरभरेण[3] स्यन्दोलिकाविशेषमालामान्दोलयन्त्यो[4] दिवसनिशासन्ध्याव्यतिरिक्तमिव समयं निष्पादयन्त्यः श्रीचित्रसेनमहीमहेन्द्र[सेना] महासेनाधिष्ठिता इव देवसेनाः समतीत्य ग्रामनगरमयानि भुवनानि काननमासादयामासुः ॥३०॥

तत्र क्वचन कपिलकृष्णकौशिकशुकपिप्पलायनहारीतभारद्वाजप्रमुखद्विजसमाजोद्गीतरम्याणि शाखासहस्राणि बिभ्राणां श्रुतिपरम्परामिव, क्वचिदुभयभागनिरन्तरसन्ततशरसञ्चारदुरवगाहसद्रोणार्जुनशिंखण्डिनकुलवाणासनपत्त्रिसमागमविशेषभीषणा[5]मन्तरा भीमवेगनिपात्यमानपर्वतीयपर्वतायमानमत्तमातङ्गसङ्घां नाना-

1. Ms. ०नाः० 2. Ms. ०हीं० 3. Ms. ०नि० 4. Ms. ०षामाना०
5. Ms. ०वाणामनपत्ति०

जनपदावधिकाभिधावदतिवेगवद्वाहिनीसङ्गसम्पादितकबन्धचयमहा-
ताण्डवाडम्बरविराजमानां कालवेगातिविवर्धमानरंहःसङ्गतसमा-
पतद्वाङ्गेयोत्तारहारनिनादनिरस्यमानधार्तराष्ट्रोलूकशकुनिमत्स्यराजां
क्वचन विवर्धमानकर्णशल्यविषमविवर्धनध्वानां महाभारतमहा-
सङ्ग्राममहीमिव महीयसीं सिन्धुसम्भेदपरम्परां, क्वचिदनलनल-
वरुणमरु[त्व]दहि[म]दीधितिभूसमागतां कुण्डिननगरीमिव, क्व-
चिदतिवेगाभिघातनिपतन्महाशिलीमुखव्यूहच्युम्ब्यमानपुण्डरीककुव
लयां महासरसीमिव, क्वचिदुद्यत्सोमार्कविम्बभूषितां नभोमण्डली-
मिव, क्वचन विकचमनोहारिचम्पककलिकाकलापव्याजेन महाराज-
मङ्गलनीराजनाय वनदैवतप्रवर्तितमिव दीपकलिकाकलापमादधानां,
समुच्छ्रितानेकचन्द्रकिचमरीपुच्छतालवृन्ततयाभ्यागतमहीमहेन्द्र-
व्यजनक्रियामिव सम्पादयन्तीं,केकिकोकिलकलकण्ठनीलकण्ठकल-
कण्ठध्वनिमिषेण स्वागतमिव पवनजवगलितललितकुसुमसञ्चय-
मयमिवोपचारं तन्वि स्यन्दमानामन्दमकरन्दमयानीव पाद्याचमनी-
यानि वितन्वानाम्, अतिमनोहरां काननलेखान्ददर्श ॥ ३१ ॥

तत्र च काञ्चन काञ्चनविद्रुमालङ्कृतां महामानवतीं,
काञ्चन वियोगातिशयमलिनां समदनाञ्च, काञ्चन वयोविशेषोपनीत-
रजोयोगदूषितां, काञ्चन स्निग्धातिमुग्धसुधीरधरसङ्गतां, काञ्चन
पुरतो विराजमानात्तकदम्बां क्रीडानिरतामिव कामिनी[ं], काञ्चन
मरुद्वरालिङ्ग्यमानहरिणीरम्भालम्बुषाममरावतीमिव, काञ्चन
सताण्डवपिशाचमण्डलमध्यवर्तिभुजङ्गमालङ्कृतस्थाणुस्थानमयीं
कैलासगुहामिव, काञ्चन नरहरिवराहत्रिविक्रमचरितमयीं पुराणेति-
हासकथामिव, काञ्चन वाल्मीकशाणिडल्यव्याघ्रपादालङ्कृतां तप[ः]-
स्थलीमिव, काञ्च[न] ब्रह्मैकतानभावननिरतां महायोगिनीमिव,

1. Ms. ०च्चा० 2. Ms. ०र्द्ध० 3. Ms. ०नि० 4. Ms. ०दिङ्मी०
5. Ms, कुम्भिल० 6. Ms. कुवलवयां 7.Ms. ०किं० 8. Ms. ०न्निः०
9. Ms. ०न्ना० 10. Ms. ०नस्नु०

काञ्चन खरतरखड्गाभिघातपात्यमानधूम्रलोचनचण्डमुण्डमहिषां प्रकटितसिंहासनां हैमवतीमिव, काञ्चन रात्रिञ्चरतरुणीगणपरिवृतामशोकवनावस्थानां विदेहभूतनयां श्रीसीतामिव, क्वचन ताम्बूलपूगखदिरकर्पूरलवङ्गैलावासितद्विजराजिशोभमानां कृष्णागुरुचन्दनाञ्जनमृगमदहरितालतिलकपत्रावलीभूषितां वासकसज्जामिव, क्वचन प्रलम्बलाङ्गलिचक्रिविलोकनोत्कण्ठितपशुपालशिशुमण्डलां विषाणवेणुविविधनिनादपूरितदिगन्तरां व्रजस्थलीमिव, महीयसीं वनमहीमहीनसत्त्वो महीपतिरवलोकयामास[1] ॥३२॥

केचिद्वारविलासिनीमुखसुधापानैकबद्धादरा[2]
भूपाः केचन सीधुपाननिरता मिथ्यातपोव्यञ्जनाः ।
एकः श्रीयुतचित्रसेननृपतिः पादत्रयीविच्युतं
धर्मन्धारयते न चेत् कथमसौ तिष्ठेदनालम्बनः ॥४८॥

अपि च

विद्यासत्कवितासदर्थरुचिरालङ्कारचर्चादिभि-[3]
र्नित्यं दैवतदीनभूसुरघटासन्तर्पणार्चादिभिः[4] ।
धन्यीकृत्य धरातलं विजयते क्ष्मापालचूडामणि-[5]
र्धत्ते चैकभुजेन भूमिवलयं श्रीचित्रसेनः कृती ॥४९॥

अपि च

पुरोगतुरगावलीखुरशताहता भूरियं
गजालिककटस्खलन्मदजलैरभूद्दुस्तरा[6][7] ।
अथो नु रथगामिनः कथमिमां तरिष्यन्त्यहो
[महो]र्मिचयभीषणामिति भयं समुन्मीलति ॥५०॥

अथवा अहो जातोऽयमुपायः क्षणादेव ॥३३॥

---

1. Ms. ०त्वो 2. Ms. ०धा० 3. Ms. ०म० 4. Ms. ०र्दे० 5. Ms. ०न्नी० 6. Ms. ०नि० 7. Ms. ०न०

तथाहि

यस्योत्तुङ्गतुरङ्गदारुणखुरक्षोदेन कुम्भ्युल्लसत्-
कुम्भव्रातसमुच्छलन्मदजलैर्यां भूरभूदुस्तरा ।
तस्यैवाश्वगणैः खुरोद्धुतरजोराजीभिरेषा क्षणा-
न्नीता भो मरुतां [तथा च मरुतां] संवर्धनापातनैः ॥५१॥

इत्थमपि तत्र तत्र वनवासिजनगीयमानमाकर्णयामास ॥३३॥

ततश्च "भो भोः सेनापतयः सेनापतिनिदेशवर्तिनश्च सावधानैः श्रूयतामवधार्यताञ्च–एषा सत्वरचरणाङ्कसञ्चारसूचिता शशकशल्लकी-प्रसूमरसूमरकृष्णसारसारङ्गसङ्कुला काननवीथी, त्विदमपि कराल-काननकोलकलापलुलापकण्ठीरवकरिनिकरकण्ठगर्जितमतिभयङ्करं, पुरतोऽपि गण्डशैलमण्डलायमानगण्डकपुण्डरीकचण्डचीत्कार-घोरघोषम्, इतो वञ्चकवनविडालवानरवृकवृन्दान्दोलनचञ्चलतरम्, अपरमपि पार्श्वतो भीमस्वनभङ्गनिवहभीषणम्, अपरमपि मयूर-सारसकपोतकलविङ्ककोकिलकलकण्ठकुक्कुटकोयष्टिककुभकारण्डव-शुकसगुणपत्रसाङ्काररवशङ्काकरम्, इदमपि जरदजगरगरलानलधूम-शिखाकारश्वसितानिलसञ्चार[द]न्दह्यमानं, क्वचिदपि भुजङ्गम-सङ्गभूषितभूताधिपप्रचण्डस्रवदण्डतालवेतालभैरवभूमण्डलं कैलास-कन्दरमिव । तदिदानीं समन्ताद्विष्टभ्यन्तां समारोप्यन्तां वागु-रापाशाः, समन्तात् स्थाप्यन्तां द्विरदतुरङ्गशकटस्यन्दनारोहाः, दीप्यन्तां ज्वलनाः, योज्यन्तामनलयन्त्राणि,आरोप्यन्तां शरासनानि, मोच्यन्तां शराः सारमेय[ा]श्च, क्षिप्यन्तां विक्रान्तशकुन्ताः कुन्ताश्च, आसन्नेषु च निपात्यन्तां क्षुद्रकाश्चन्द्रहासाश्च" इति समन्तादश्रूयत महान् घोषणानिनादः ॥३४॥

---

1. Ms. ०त० 2. Ms. ०म्भ्य० 3. Ms. ०या 4. Ms. ०नु०
5. Ms. ०ना० 6. Ms. ०ऽव० 7. Ms. ०ङ्क० 8 Ms. ०शङ्क०
9. Ms. ०अ० 10. Ms. ०गाः 11. Ms. ०ज्व०

ततश्च चञ्चलचन्द्रहाससहस्रचञ्चलासञ्चयसञ्चारचित्रित-
मन्योन्यसंघट्टनठनायमानविविधायुधसंघर्षणजनितज्वलनसञ्चय-
खद्योतजालमया[न्त]रीक्षं दहनयन्त्राभिघातस्फूर्जथुगर्जितमयदिग्व-
लयं प्रचण्डदहनभयसत्वरपलायमानगहनचरजन्तुसन्तानतरलमहा-
वेगसञ्जनितप्रचण्डझञ्झाप्रभञ्जनान्दोलनदोलायितभुवनमण्डलमाकृ-
ष्यमाणप्रचुरकोदण्डनिचयसमुदितमहेन्द्रचापकलापं खरतरखड्ग-
धारावदार्यमाणवनकरिनिकरकुम्भनिवहनिर्गलविगलन्मुक्ताफल-
कलापमयकरकासम्पातगम्भीरमनवरतवेगसन्निपातजनितामित-
खड्गझङ्कारघोरगम्भीरनिस्वनं निरन्तरदुरन्तशरधारासारमय-
मकालप्रलयदुर्दिनमाविरासीत् ॥३५॥

ततश्च मुहुर्मुहुरितस्ततः पलायमानानां वृकवराहवारणवानरवन-
विडालवञ्चकव्यालवनमानुषवयसां कोककुम्भिकण्ठीरवकालसार-
कुम्भीनसकाद्रवेयाणां चमूरुचमरीचीनमुखमृगमहिषमहामातङ्गानां
शृङ्गखुररदनवदनघोणाघनघनघर्घरघुत्कृतिचीत्कृतिहुङ्कृतिविचित्र-
ध्वनिमयसमुचितं विचित्रङ्किमपि कल्पयामास भूवलयम् ॥३६॥

अनन्तरञ्च प्रचुरशरसञ्चारविध्यमानेषु सारङ्गसङ्घेषु, खरतर-
खड्गलताखण्ड्यमानेषु च खड्गमण्डलेषु, श्येनमुखपतत्रिचञ्चु-
चरणाघातपात्यमानेषु च पतगेषु, प्रचुरकुन्तकृपाणकाण्डमुखहेति-
हन्यमानेषु महावराहमहिषमातङ्गेषु ज्वलज्ज्वलनज्वालाजालभीषि-
तेषु च, जालपतनसंयम्यमानेषु शशकशल्लकीशम्बरशालावृकेषु,
झटिति महाकाननान्निःसरन्तमतिपवमानमानसरंहसं विकचपद्म-
पद्मरागनवपद्मबान्धवमरकतमहेन्द्रनीलहेमहीरहरिदश्वोपलहिम-
किरणमणिहारहारिविचित्रचित्रमयकान्तकान्तिच्छटाच्छुरितदिग्व-

1. Ms. ०ञ्ची० 2. Ms. ०व० 3. Ms. ०ज्ञ० 4. Ms. has one redundant व after प्रभ 5. Ms ०नमय० 6. Ms. ०मु० 7. Ms. ०म० 8. Ms. ०वन्धि० 9. Ms. ०घ्यु० 10. Ms. ०छ्व० 11. Ms. ०छ्रु०

लयं, जाज्वल्यमानविलोचनयुगलतरलतारकान्दोलनेन दिवापि तारकामयमिव मुक्ताफलमयमिव व्योमा[व]काशवलयं वितन्वानम्, अतितरविजृम्भमाणमहावेगतया गगनतलमात्रसञ्चारमिव दृश्यमानं, महेन्द्रचापचयावकीर्णमिव तडिल्लतापुञ्जसञ्छादितमिव नभो दर्शयन्तम्, अम्बरकासारसलिलपिपासयोत्प्लवन्तमिव, निरपराधबाध्यमाननिजान्वयस्य महाराजस्याविनयमावेदयितुं चराचराधीश्वराय गोलोकतलोत्पतनाय कृतोद्यममिव, मयीदृशरूपगुणगरिमशालिनि किमिति हरिणान्तरमपि पीयूषकिरणाङ्कमारोहतीति हिमकिरणाङ्कमिवोद्दिश्य कृतोत्पतनं, भूवलयसमग्रतृणरसमास्वाद्य नन्दनवनघासप्रयासतया महेन्द्रनगराय कृतप्रयाणमिव, विविधमनोह[ा]रिकिरणघोरणीदेदीप्यमानं पश्चिमाशाभिमुखमभिद्रवन्तं महामृगन्ददर्श ॥३७॥

ततश्च समन्तादित इतस्तत[स्ततः]पुरतः पुरतः पश्चात्[पश्चात्] वामे वामे सव्ये सव्ये ऊर्ध्वमूर्ध्वमहो नेत्यत इदानीमहो निभृतमालोक्यतामर्ककिरणजालान्तरिततया दुरालोकतामावहतीति सत्यं सत्यमयमयमित इतः कुतः कुत इति भाषमाणानां निवृत्तमृगान्तरानुसरणानामतितरप्रयत्नविहितपार्ष्णिकशाङ्कुशपातद्विगुणितजवपत्रतुलितचतुरतुरगकरिसञ्चारिणामूर्ध्वावलोकननियोजितजननिवहावेदिततादृशगमनसरणीनां धावनवेगश्रमजनितातिशयितक्षुत्पिपासासाक्षामकण्ठानां तदासादनमहाव्रतसम्पादनविषयमात्रसमुत्कण्ठानां धावतां महावीराणां खनखनायमानतुरगखुरनिस्वनेन श्रमभरखिन्नवाहसफेनफोत्कारतारतरनिनदेन वेगवशाद्विसंष्ठुलचपलचर्मचन्द्रहासचापकवचविश्लथश्रृङ्खलाप्रेङ्खोलनजनितझनत्कारघोरनादेन बधिरीकृतमिव चराचरन्तस्थौ ॥३८॥

---

1. Ms. ०ष्ना० 2. Ms. ०वा 3. Ms. ०ह० 4. Ms. ०स्ता० 5. Ms. ०त्त० 6. Ms. ०ल० 7. द्धा 8. Ms. ०च्चु० 9. Ms. ०न०

संवृत्ते मृगयाविहारकुतुके श्रीचित्रसेने नृपे
मन्ये तन्मुखनिर्जितामृतरुचेरातङ्कलोलाङ्कतः ।
प्रभ्रष्टोऽयमतीवशङ्कितमनाः सारङ्गशावो महा-
वेगो धावति विष्णुधामनि निरातङ्कं पदं प्रार्थयन् ॥५२॥

अथवा

एतस्मिन्नतिनिर्दयं नरपतौ श्रीचित्रसेने मृगा-
नुच्चैर्निघ्नति तद्यशोमुखपराभूतं विलोक्याश्रयम् ।
पीयूषांशुसमाश्रितो मृगशिशुस्तस्माद्भृशं शङ्कया
शङ्के धावति विष्णुधामनि निरातङ्कं पदं प्रार्थयन् ॥५२॥

अपि च

एतस्मिन्मृगयारतौ नरपतौ श्रीचित्रसेने मृग-
श्चित्रश्चित्ररयस्तनोति परितश्चित्रा गतीश्चित्रदृक् ।
एतद्वेगवपुर्विलोलनचमत्कारान् समालोकयन्
लोको विस्म[यवि]स्मृतान्यवि[ष]यश्चित्रायते सर्वतः] ॥५३॥

एवमनेकविधानि तत्र काननकेतनकविनिवहसमुच्चारितानि समाकर्णयन्नाकर्णपूर्णशरासनमण्डलमध्यारोपितसायको धरणि-नायकोऽपि तमतिधावन्तमनुधावन्, विडम्बयन्निवाङ्गीकृतसारङ्ग-शरीरं सरोजसम्भवमनुधावन्तं शशाङ्कशेखरं, महीदुहितृमोहनाय मायामयमनोहरमृगमूर्तिं मारीचमनुधावन्तं भगवन्तं श्रीरामचन्द्र-मिवा[नु]कुर्वाणः, मदनोन्मादवशान्मैथुनाय मृगमूर्तिधरं मुनीन्द्र-मनुसरन्तं मनुजराजं विचित्रवीर्यं वैचित्रवीर्यमिवानुकुर्वन्,मृगरूप-धरमतिद्रुतविद्रुतं दक्षाध्वरमनुविद्रवन् रुद्रानुचरो वीरभद्र इ[व],

1. Ms. has one redundant क after विलोल 2. Ms. ०रा०
3. Ms. ०न्या० 4. Ms. ०ध्व० 5. Ms. ०मु०

अरणीस[म]न्वितमन्थदारुहारिणं हरिणमनुसरन् धर्मराज इव, अतीतसमस्तसामन्तचक्रः, शक्र इव क्षीरनीरधिसम्भवमर्वन्तमुच्चैश्रवसमधिरूढ उच्चैस्तरां त्वरयंस्तुरङ्गमराजम्, अनालोचयन् लोचनपथवर्तीन्यपि नानाजनपदजनगणनगरविपणिभवनोपवनविटपिपटलपरिपाटीपल्वलपुष्करिणीसरित्सरसीसरसीकृतानि[1] वर्त्मानि, तन्मृगरूपरयविलोकनव्याकुललोललोचन[ो] विस्मयविशेषचमत्कारभारमन्थरमानसः सुदूरमनुसरन्नविज्ञातानेकशतयोजनमात्रमध्वानं विलङ्घयामास ॥३६॥

अथाविश्रान्तातिमहाजवपवमानायमानतुरङ्गममात्रद्वितीयस्याद्वितीयमहिममहनीयस्य महीमहेन्द्रस्याभूतचरं श्रमभरमालोक्य परमकारुणिकतया भक्तवत्सलतया च रोषा[वे]शारुणित इव सहायतामिव कुर्वाणः पश्चिमाशाभिमुखमभिद्रवन्तन्त[ं] प्रति सारङ्गं प्रजवितसप्ताश्ववेगद्विगुणसमाकृष्यमाणस्यन्दन इवाभिधावन्नग्रेसरो[2] भगवान् सहस्रकिरणोऽपि झटिति पश्चिमाचलशिखरसीमामवाप ॥४०॥

अथ चरममहीधरशिरःसरसीताम्रसरसीरुहे महति मिहिरमण्डले मुद्रामिवोपगच्छति सुवितततकिरणपटले[3] शतदलसहस्रसङ्कोचभाजि[4], माध्वीकपाननिराशतयेव तत उड्डीयाशान्तरान्तरान्तरालमवलम्बमानेषु[5] ज्वलिष्यत्प्रोषितपतिकादुरन्तदुःखदवदहनधूमायमानेषु[6] तिमिरसमाजव्याजरोलम्बकदम्बेषु, चतुरदूतीजनसङ्केतोदितसङ्केतकेतनसंक्रान्तकान्तोदन्ततया स्फुरितनितान्तसन्तोषसन्तानतरलहृदय[ा]स्वभिसारिकासु[7], सुचिरसहवासप्रेमपरम्परापरिचितचक्रवाकतरुणीनवियोगदुःखदर्शनादिव म्लानि[मु]पप्रयान्तीः पद्मिनीरपहाय सहासकुमुद्वतीरभिधावत्सु[8] मधुप-

1. Ms. ०र्म्मा० 2. Ms. ०म० 3. Ms. ०ल 4. Ms. छुल०
5. Ms. ०च्छी० 6. Ms. ज्यनि० 7. Ms. ०म्प्रे० 8. Ms. म०

समूहेषु, स हरिणयुवा सहस्रकिरणेनैव[1] समश्चरमगिरिगुहामतीत्य लोचनपथं प्रविशन्निवान्तर्धानमियाय ॥४१॥

अतीते च तस्मिन् हरिणे[2] लोचनसरणिं, सङ्कुचितसमस्तकिरणकलापे च भगवति मयूखमालिनि, समन्तात् सञ्चारितदृष्टिप्रसरो नरपतिरनवलोक्य च तं मृगमालोच्य च वासरावसानसीमसमयं मृगयाव्यापारनिवृत्तवृत्तिरन्तरीक्षतोऽपि[3] निराकृतनेत्रसञ्चारः समन्तात् समासन्नभूमीवलयमवलोकयामास ॥४२॥

सं[गत्या]पि करैः सुधासहचरैः शीतैः कलानां निधेः
संयाते चरमाचलस्य शिखरं चण्डत्विषि[4] प्रेयसि ।
एषा संमलिनीकरोति नलिनी भावं स्वभावाद्भुतं
कर्तव्या कृतिभिः प्रसन्नमतिभिर्मैत्री पुनस्त्वीदृशी ॥५४॥

अपि च

चक्रीर्मुञ्चति चक्रवाकनिकरे भृङ्गेषु पद्माटवी-
र्मानं मानवतीषु पान्थनिवहे सञ्जीविताशामपि ।
दैन्येनातिदयार्द्रभावजनुषा भूमीरुहाः प्रोच्चकैः
क्रन्दन्तीव कुलायलीनवयसां रावैस्तुषाराश्रुभिः[5] ॥५५॥

किञ्च

सुस्नाताः सरसीसरित्सु कुसुमान्याहृत्य[6] भूमीरुहां
तन्वानाश्च[7] दिगम्बरार्चनविधिं क्षामास्तपोभिः किमु ।
प्रोच्चैःपूरितवेणुरन्ध्रमधुरध्वानैर्यशो धूर्जटे-
र्गायन्तीव शनैर्नटन्त्यपि जगत्प्राणाः समन्तादमी ॥५६॥

---

1. Ms. ०ने० 2. Ms. ०ण 3. Ms. ०त्र० 4. Ms. ०द्वि०
5. Ms. वावैस्तुषाराश्रुतिः । 6. Ms. ०कृ० 7. Ms. ०म्वाला०

जातीचम्पकमालतीस्तरलयन् मल्लीः समान्दोलयन्
धुन्वन् केतककेतकीकुरुवकान्यास्फालयन् यूथिकाः ।
कान्ताक्रान्तवधूमुखाम्बुजमधून्यास्वादयन् कैरव-
श्रेणीरेणुविलुप्तदृष्टिरनिलो मन्दां गतिं विन्दति ॥५७॥

श्रीखण्डाद्रितुषारभूमिधरयोः संवादसंवेदको
दूतोऽयं पवनो गतागतवशान्मन्ये गत[:] क्षीणताम् ।
गङ्गाद्वारसमुद्रसङ्गममहातीर्थावगाहान्महा-
पुण्योऽप्येष निहन्ति किं विरहिणीः पद्माटवीलम्पटः ॥५८॥

समन्तात् सन्तापं शमयति वसन्तानिलसखः
सुधांशुः सम्पूर्णः श्रवणमधुरः कोकिलरवः ।
तदाशु श्रेयस्ते गमनमतिदूरञ्जिगमिषो-
स्तमःपुञ्जे कुञ्जे क्षणमिह न वासः समुचितः ॥५९॥

इत्यादीनि तत्तद्देशनिकायतत्तदवस्थमध्यस्थजनसमाजभणितान्याकर्णयामास ॥४३॥

ततश्च तत्र सायन्तनविधेयसन्ध्यावन्दनपरदैवतचरणसरोजमननमनुजपनप्रणमनमनाः श्रमापनोदनार्थावगाहनसलिलपानाशया सलिलाशयमन्वेषमाणो मुहुर्मुहुरितस्ततो विस्फारितलोचनश्रवण[ो] निगृहीतरश्मिः शनैः शनैस्तुरगारूढ एव समन्ततो बभ्राम ॥४४॥

परिभ्रमंश्च प्रावृषेण्याम्भोवाहव्यूहगर्जितगम्भीरभूरिभैरवरवसोदरं सलिलावगाहनप्रवृत्तगहनचरमत्तमातङ्गयूथान्दोलिततरलकल्लोलभात्कृतिवनवराहनिवहघोणाघुत्कृतिमृगराजमृगादनभल्लगण्डकपुण्डरीकगणघनघनघर्घरनिनादनिकरं भरितसमीपशैलगुहाकुहरं प्रतिध्वानसम्पूर्यमाणरोदसीविवरं शुश्राव ॥४४॥

---

1. Ms. ०वन० 2. Ms. ०राः 3. Ms. ०या० 4. Ms. ०र्य्या०
5. Ms. ०त्या० 6. Ms. ०गदे० 7. Ms. ०य

तेन सत्वरमाहूयमान इव पुरतो हिन्तालतालतमालतालीप्रायैः, एकतश्च शिंशपाशिरीषशाल्मलिशालशल्लकीसरलसहकारसिन्धुवारसर्जार्जुनाञ्जनबहुलैः[1], अन्यतश्च काञ्चनकुरुवककदम्बकुटजकङ्कोलकिरातकेतककुन्दमुचुकुन्दकक्कोलकमु[क]कालागुरुकङ्केल्लिकुटुम्बिन्येरकाभूयिष्ठैः[2-5], अपरत्र च लवलीलवङ्गलोध्रपनसपलाशपीतशालपाटलिपुन्नागनागकेशरपिप्पलप्रियङ्गुप्रधानैः, निरस्तचन्द्रार्ककरप्रवेशैः पातालतलैरिव, सलिलाहरणार्थमागतैर्महामेघसमूहैरिव, निरवधिविविधफलपल्लवभारभूषितविश्वम्भरैर्महाभागवतैरिव, निरन्तरफलकुसुमसन्तानसन्तोष्यमाणशाखाचरणविन्यस्तनिश्चलहृदयश्रुतिमधुरध्वाननिपुणद्विजसमाजैर्महाधार्मिकैरिव, प्रभाकररथपथरोधनाय गगनमुत्पतद्भिर्विन्ध्याचलशिखरैरिव, महामहीरुहैः श्यामायमानमतिप्रमाणं नयनपथातीतसीमानं चतुरस्राकारं सारमिव वसुन्धराया द्वीपविशेषमिव भूखण्डं ददर्श ॥४६॥

ततश्च सुविमलशिशिरसलिलशीकरासारशीतलेन कमलकुमुदकुवलयकह्लारहल्लकमुखकुसुमसञ्चयमाध्वीकमधुरेण तीरतरुतनुतरकुसुमसञ्चयसञ्चारणचतुरेणाभ्यागतमहीपतिसभाजन[ा]य प्रेरितेनेव[6-7] दूतभूतमारुतेनालिङ्ग्यमानः, नीरतीरभूरुहनिलयसारसकलहंसकारण्डवकोककङ्ककलविङ्ककुररकेककोकिलकोयष्टिककुक्कुटककुभकपोतकपिञ्जलादिद्विजकुलमञ्जुलकलकलकोलाहलैः[8-9] स्वागतप्रश्नपुरस्सरं सादरमाहूयमान इव, मृगमृगराजमृगादनवानरवराहवारणवञ्चकवृषवृषदंशहंससारसवकजीवञ्जीवकचमूरुचमरीचीनचातकचरणखुरन[ख]राङ्कपङ्कपङ्कजशैवलमृणालकुवलयकुमुदकह्लारैः[10-12] सम-

---

1. Ms. ०ञ्चव० 2. Ms. reads कैङ्किशो in place of कङ्कोल
3. Ms. ०क० 4. Ms. reads ककेकाल in place of कक्कोल
5. Ms. ०कुतुम्मीचैरक० 6. Ms. reads शिषिशिर instead of शिशिर
7. Ms. ०ख्या० 8. Ms. ०ङ्क० 9. Ms. ०क० 10. Ms. ०गदे०
11. Ms. ०र० 12. Ms. ०म०

न्ततोऽवकीर्णैरनुमीयमानाम्, अतिसरलशल्लकीशालदेवदारुपिप्पल-
पनसपलाशरसालपीतशालतमालताल खर्जुरार्जुनाञ्जननारिकेलकक्कोल[1]-
क्रमुकमुचुकुन्दचम्पकजम्बीरजम्बूकदम्बपुन्नागनागकेशरप्रमुख-
तरुणतरुप्रचयमयवीथीद्वयमध्यनिकायभूतशिशिरच्छायामनोहरभू[2]-
भागविरचितसुचिराच्छस्फटिकमयदेदीप्यमानवितानाम्, पदवी[3][']
सुदवीयसीमवलोकयामास [4]॥४७॥

ततश्च तदनुसरणेनासादितावकाशो दूरादेव पारदरसधारामय-
महाभुवनविता[ना]यमानशारदराकारोहिणीरमणकिरणधोरणीविद्यो-
तमानं सुधौतसूक्ष्मचीनांशुकाच्छादितमिव नारदशारदाशङ्करसङ्कर्षण-
शेषसोमशरीरसमूहसम्बाधं सुधापूरप्लावितमिव सौधसन्दोहमति-
विशदतया पाण्डरतन्तुसन्तानमिव निरूप्यमाणं निपुणनिपुणमपि
निरीक्ष्य [5]मुहुर्मुहुरतिमात्रविवर्धमानकुतूहलतया वितर्कयामास ॥४८॥

समुपजातकुतूहलश्च प्रजवितुरङ्गमो निमेषमात्रेण तम्प्रदेश-
मासासाद ॥४९॥

ततश्च निखिललोकपालभवनोपान्तसीमापर्यन्तसन्ततान्तरालसान्त-
रीक्ष[क्ष]मामण्डलमण्डनायमानम्, प्रचण्डपवनदोधूयमानम्, अखण्ड-
पाण्डरपटमयमहामण्डपमिव, द्रवितसुधौतकलधौतधारासारमय[6]-
महासागरमिव, भूतिभरभूषितभैरवभूतनाथभवानीगुरुभूधरभारती-
भानुभरभरितमिव, शङ्करसङ्गीतश्रवणद्रवितचराचरकारुणमयकारुण-
नीरपूरमिव, सरोजन्मजन्मभूमिभूतमहासरोजकाननप्रभवभवनमहा-
सरोवरमिव, महाप्रलयविशेषप्लवमानक्षीरोदमयैकार्णवपयःप्रचय-
मिव, त्रैलोक्यनाथसम्प्रदानकनिरुपधिभुवनत्रयसम्प्रदानसम्पादिता-
नुक्षणोपचीयमानम्पातालतलादुत्तिष्ठमानं दानवनिकरशिरोमणि-
वैरोचनियशःप्रवाहमिव, भूतभर्तृभवनभूतभूमीधरभुजगभूपालयो-

---

1. Ms. reads ककेकाल in place of कक्कोल 2. Ms. ०रे छा
3. Ms. ०स्फु० 4. Ms. स० 5. Ms. ०क्षी० 6. Ms. ०रा०

र्मिथः स्पर्धया धावन्निज[निज]धामधाराधोरणिमयमहासिन्धुद्वन्द्व-
सम्भेदमिव, ऐन्द्रजालिकविद्यामयमिव गोचरीक्रियमाणभुवनत्रय-
वृत्तान्तं,समीरसञ्चार्यमाणनीरशीकरकदम्बतया सुविमलविपुलमुक्ता-
फलज[ा]लमयानीव दिक्पालभवनतोरणानि तन्वानम्, आश्चर्य-
ज्योतिश्चक्रमिव तुलाविहीनम्, अनादिपुरुषचरितमिव मीनकूर्ममहा-
वराहानेकविक्रमनरहरिरामलक्ष्मणावतारमणीयं शङ्खचक्रगदाभिरामं
मकरकुण्डलिकमलालङ्कृतमनन्तभुजगराजभोगपर्यङ्कञ्च, सौरभ-
विशेषानुमीयमानभ्रमरसञ्चयसञ्छादितप्रकाण्डशतसहस्रपत्रपुण्ड-
रीककैरवगहनं, कोककामिनीकुलकुलायभूतनवीननीरजबान्धवविम्ब-
कदम्बायमानकोकनदकाननं, निर्विशेषरूपत्वेन नेत्रानिर्णेतव्यविशेष-
तया कलरुतमात्रानुमीयमानाच्छलच्छरीकसञ्चयसमुपचीयमान-
महानीलोत्पलगहनं, सुरतसम्भोगपरिश्रमापनिनीषुपुरन्दरपुलोम-
जापीयूषपूरपानोत्तराचमनावकीर्णतत्तत्करतलगलितामृतशेषलेश-
मन्दारहारव्यतिकरवर्धितनिसर्गहारिपरिमलसम्भारभारमन्थरतया
साहङ्कारैरिवाव्यामोहनिजनिजनिकेतनावस्थानावस्थयैव निष्पाद्य-
माननिरन्तरनीरनिर्वाहणीयावगाहनसन्ध्योपासनतर्पणपानाचमना-
दिभिः सनकादिभिर्मरीचिमुखैः सप्तर्षिभिराशीर्भिरभिसंवर्ध्यमानैरिव
तत्तत्करतलविगलितकुशकुसुमाक्षतदूर्वाकिसलयसनाथैर्गोलोक-
सुखोषितसुरभीप्रमुखगवीपिपासाखेदापनोदनस्नपनसंक्रान्ततत्पयः-
पूरतद्वत्स्वमुखफेनपिण्डातितरमधुरपाण्डरसुरभीकृतैः स्वामि-
सम्बन्धनिबन्धनिबन्धनातिप्रेमसाध्वसवशादिव पाशपाणिभवना-
वरणमहाप्राकारतया परिण[म]द्भिर्महातरङ्गैरुद्धोतमानं, हैमवती-
स्तनयुगलमिव गजेन्द्राननास्वाद्यमानपयोधरं, कामिनीहृदयमिव
स्फुरन्मकरकेतनम्, अनेकधा पितामहमाधवमहेशमाहेश्वरीमिहिर-

---

1. Ms. ०विद्यानमय० 2. Ms. ०जला० 3. Ms. तन्नानां०
4. Ms. ०र्ण० 5. Ms. ०मा० 6. Ms. ०व अ० 7. Ms. ०स्र०
8. Ms. ०द्यो०

मातङ्गमुखमहासेनमन्मथमहेन्द्रमारुतमुखमरुन्मण्डलीमन्त्रमुखराव-
गाहनमज्जनोन्मज्जनलीलापुरस्सरपरस्परविरचितरुचिरकरयन्त्रनि:-
सार्यमाणनीरधारासहस्रसन्ताडनसन्तरणसन्ध्योपासनमननपरि-
पूजनध्यानाध्ययनविधानातीर्थतीर्थकृतं, राजसूयाध्व[र]राजदीक्षित-
द्विजराजत्रिसवनावगाहनसंक्रान्तत[द]ङ्गसङ्गलितामृतसारसञ्चार-
स्वादुस्वादुतरीकृतपय:प्रवाहम्, अनेकशतसंवत्सरनिर्वाहणीयव्रत-
व्रातनिर्वाहणाय सवालिखिल्यसप्तर्षिसनकादिभिश्चिररात्रोषिततीरा-
लङ्कृत[स]त्त्वसुमृष्टसन्ततनिस्तमोरजस्कभवनोपवनं, दाक्षायणी-
विरहदूनमहेशदेहदाहमहौषधीभूतनीरशीकरासारकैरवपुण्डरीकदल-
मृणालशैवलतीरपादपालवालं, क्वचन श्रीभ[ा]गवतमहापुराणमिव
दलितकुवलयापीडवकधेनुकतृणावर्तकृष्णसारचरितं, क्वचन सच्चि-
दानन्दमयमिव परमहंसास्वाद्यमानरसमद्वितीयं देदीप्यमानमन्त:-
प्रतिबिम्बितविश्वप्रपञ्चमपारमविकारञ्च, क्वचन पार्वतीवदनबिम्ब-
मिव नीलकण्ठास्वाद्यमानपीयूषाधिकपरमरसधारं, चित्रलेखाप्सरो-
विरचितमहाचित्रपटवितानमिव, स्फुटतरोपलभ्यमानसपरिकरेङ्गि-
ताकारचतुर्दशभुवनभवनोपवनवृत्तान्तं, पाराव्रारमिव प्रबलतिमि-
तिमिङ्गिलमहामकरकुम्भीरशिशुमारम्, अन्तरुल्लासितानन्तपुण्डरीक-
लोचनं, प्रकटितविराटमूर्तेरिव भगवतो नारायणस्य कायच्छाया-
वलोकनविपुल[ा]दर्शमण्डलं, सिद्धसाधनस्थलमप्यदूषणावकाशं,
निखिलव्याप्तिमत्तया निर्णीयमानमप्यसत्प्रतिपक्षमप्यसाधारणं,
दृश्यमानबहुवयोविस्तारमपि सुकुमारम्, अतितरलमपि महागम्भीरं,
विजृम्भमाणजीवनमपि निरन्तरतरङ्गवाचालमपि मीनकेतनमञ्जीर-
चञ्चलाशयमप्यचेतनं, निजनिजाशावस्थितैरेवाशास्तम्बेरमै: सुख-

1. Ms. ०स्प० 2. Ms. ०ध्या० 3. Ms. ०र्था० 4. Ms. ०ध०
5. Ms. ०सङ्गलिततामृत० 6. Ms. ०त्व० 7. Ms. ०सृ०
8. Ms. ०द्द० 9. Ms. ०म्वा० 10. Ms. ०स० 11. ०वारेङ्गि०
12. Ms. ०च० 13. Ms. ०न० 14. Ms. ०ङ्का० 15. Ms. ०नं
16. Ms. ०स०

सम्पीयमानसलिलसम्पातं[1], भुवनाद्भुतमदृष्टचरमनाकर्णितपूर्वमपूर्ववृत्तान्तसंघं महातरङ्गं [सत्सङ्गं] नाम महासरः समालोकयामास ॥५०

विलोकनमात्रादेवापगतनिखिलभ्रान्तिसन्तानो विगलितनिःशेषनिखिलचिन्तासन्तानसन्तापतया च विशदीभूतान्तःकरणकरणो मुहूर्तमात्रं ध्याननिमीलितलोचनो निश्चलनिर्मलमानसः समुत्पन्नसमाधिरिव कामपि परमाननुभूतचरीम्परमप्रेमानन्दपरम्परासहचरीं निर्वृतिमाससाद ॥५१॥

निर्वृतनिभृतमानसश्च चिन्तितवान्-अहो कोऽयमतिमनोहरोऽयं सरोवरो यदवलोकनमात्रेणैव स्नपिताप्यायितसर्वेन्द्रियान्तःकरणात्मनो विगलितविषमविषयवासनापाशस्य किमपि कमनीयमनास्वादितचरमतिमनोहरमत्यद्भुतमश्रुतपूर्वममृतमिवास्वादयतः सुखमतीव समतीत्य वाङ्मनसयोरध्वानमन्तरुल्लसति ॥५२॥

मन्ये च[2] यास्ताः[3] कलानिधिकला बहुलपक्षपासु हीयन्ते, ताः खलु तत आदायात्रैव महासरसि पुञ्जीक्रियन्ते प्रजापतिना। कथमन्यथा बाह्याभ्यन्तरीणसन्तापसन्तानापहरणानामगणितरसरूपान्तराणामतिमनोहर[ा]णामदृष्टान्तानामीदृशानां पयसां सम्भवः ॥५३॥

शङ्के चात्यन्तमसृणतया लोचनपथेनैव प्रविश्यान्तरान्तरात्मानमपि[4] स्नपयति पाययति निर्वापयति चान्तःसन्तापसन्तानमेतदीयमम्भः ॥५४॥

आलोकयतश्च शोभातिशयमेतस्य सरसः सर्वमन्तर्हितमिव न स्मृतिसृतिमावहति[5] किमपि—कचन राज्यं मन्त्रिराजो वा करितुरङ्गरथसेना वा ते ते राजपुरुषा वा नगरोद्यानानि कोषभवनानि वा। न किमपि तादृशप्रेमलेशोऽपि स्पृशति ॥५५॥

---

1. Ms. ०म्प्रा० 2. Ms. व 3. Ms. मा० 4. Ms. ०स्मा०
5. Ms. ०स्मृ०

अन्यच्च—मन्ये शुद्धसत्त्वगुणेन सत्यव्रतेन निष्क[ा]मकलित-
पुण्यपुञ्जेन साधुसमूहशीलजालेन च भगवता स्वयमेव नारायणेने-
यमुत्पादिता सरसी ॥५६॥

आश्चर्यं यदत्र तिर्यञ्चोऽपि रोषहिंसादिककालिममालिन्यमुक्ता-
त्मानो मुक्तात्मान इव परानन्दमयरसधारामास्वादयन्ति। तथाहि
विकचपुण्डरीकाणीव पुण्डरीकमुखानि जिघ्रन्ति कृष्णसारशिशवः,
प्रफुल्लसारसपत्राणीव सारसप[त्रा]ण्यास्फालयति खञ्जरीटपोतः,
दैवताधिदैवतं पञ्चाननमिव पञ्चाननं सिञ्चति पुष्करसलिलेन मातङ्ग-
श्चतुर्दन्तं नागेन्द्रमिव नागेन्द्र[ः], शराहतकौशिकः प्रियक्रोडमिव
क्रोडमालिङ्गति तरक्षुतरु[णस्य], भगवतो नीलकण्ठस्येव नीलकण्ठस्य
कण्ठमलङ्करोति भुजङ्गराजः सहदेवसहोदरनकुलस्येव नकुलस्य मुखं
प्रेम्णा चुम्बति, चक्रीजलमानुषयोरपि परमा मैत्री, जलदैवतवनदैव-
तयोरपि नितरामिति विचित्रचमत्कारधारावध[ा]रणविस्मापित-
मानसं मानसमपि सरो न प्रमा[णे]नेदृशमिति चिन्तितवान् ॥५७॥

किं चास्य सरसो नीरतीरसम्भवानां कुसुमानां सौरभभार-
हारिणा शीकरासारसञ्चारचारुशीतलेन परिणतफलकदम्बपातन-
निपुणेन निरन्तरतटभुवनशोधनसेचनशीलेन समीरणेनैव निष्पा-
दितातिथिसपर्यापर्यायाप्यायितः सुखमिह परममनुभवति पान्थ-
सम्प्रदायः ॥५८॥

किञ्च

सम्पूर्णा सरसीरुहैर्निरवधिक्रीडन्महासारसी
क्रीडन्ती वरशीकरैरिव नभोलक्ष्म्या च दिक्पङ्क्तिभिः।
ऊर्ध्वाधस्तनप[ा]रसीमरहिता निस्तुल्यता[मी]युषी
चेतो मे सरसीकरोति सरसी नेदीयसी नेत्रयोः ॥६०॥

---

1. Ms. ०ने० 2. Ms. ०यु० 3. Ms. ०ति० 4. Ms. ०या०
5. Ms. पंक्तिभिः 6. Ms. ०द्०

अपि च—अहो आश्चर्यं मम हि मृगतृष्णामिव कामपि मृगयां समभिधावतो मृगयमाणस्य च मृगविशेषं, सरस एतस्यावलोकनक्षणादेव दासीव समग्रप्रपञ्चमयविषयवासना प्रतिभाति, यत् सत्यं श्रीगुरुचरणसरोजप्रसादा एव जयन्ति, तत् सर्वथा कृतकृत्योहमिति श्लाघमान एवात्मानमवरुह्य व्यपनीतपर्याणन्तुरङ्गममात्मानञ्च विमुक्तकवचायुधोष्णीषभूषणं विधाय, निधाय च तीरतरुमूलस्फटिकालवालवेदिकायां सर्वं, तुरङ्गमञ्च सरसीमवतार्य स्वेच्छाविहितमज्जनोन्मज्जनसम्पीतसलिलमपि निजकरकमलविरचिताञ्जलिपुटसलिलासारेण सरसीकृत्योत्तार्य सञ्जातकोमलतृणसञ्चयशालिनि क्वचन तीरतरुप्रदेशे संस्थाप्य संयम्य च तन्मूलशाखायां, स्वयमपि सरोऽवततार ॥५६॥

अवतीर्य तत्सरःसलिलसंस्पर्शानन्दभरनिर्वृतचेता निःस्पन्दनिमीलितलोचनो[1] मुहूर्तमात्रं तस्थौ ॥६०॥

तत उत्थाय विधाय पश्चिमसन्ध्यावन्दनं निमीलितात्तः किमपि कमनीयमभिमतमवलोकयन् रूपविशेषं, मुहूर्तद्वयञ्जजाप तुष्टाव च सन्तुष्टमानसः, प्रणनाम च मुहुर्मुहुरपि साष्टाङ्गम्[2] ॥६१॥

कृतसायन्तनकृत्यकलापश्च चिन्तितवान्—अये किमिदानीं विधेयमेषा समुपस्थिता रजनी निर्जनश्चायम्प्रदेशः क्व स्थेयं कथं वा किमासनेन कतमाहारेण वेति ॥६२॥

अनन्तरञ्चामृदुमृदङ्गशङ्खध्वनिसम्बलितनान्दीनादमुखरं कमपि कलमविकलमतिमनोहरं वचनमाकर्ण्यामास [॥६३॥]यथा—

राजन् स्वागतमास्यतां वनमिदञ्चेदं सरः पूरियं
रम्योद्यानवती प्रपूरितमहाकोषा महासञ्चयैः ।
पूर्णा दैवतसिद्धचारणगणैर्विद्याधरैः किन्नरै-
रत्रैवाद्य सुखं निवत्स्य[सि] निजं सर्वं तवेदं ध्रुवम् ॥६१॥

---

1. Ms. ०लोचननो 2. Ms. ०ङ्ग० 3. Ms. ०र०

अपि च

मूर्तेनैव गुरुप्रसादपरमाभीष्टेन भाग्योदयं
साक्षात्कारमुपेयुषा मृगवराकारेण कृत्वा बलात् ।
सत्सङ्गं परमं सरस्त्वमधुना सम्प्रापितस्तत्फलं
सद्यः पश्य पुरीमुपेत्य परमां भक्तिं कृतार्थो भव ॥६२॥

ततश्च केनेदमाभाषितमिति[1] शङ्कमानस्त्वरितमभिधावद्भिर्महामणिमयं ज्वलन्महौषधिमयञ्च दीपसहस्रं धारयद्भिरपरैश्च वेत्रपाणिभिः समुद्घुष्यमाणजयशब्दैर्निजनिजकायकान्तिसन्ताननितान्तनिर्भर्त्सयमानघनान्धकारैः पाद्यार्घ्यपाणिभिरपि कतिपयैरादरावनमितमौलिभिः सविनयमागत्य [भणितं] "स्वागतं महाराजस्य । एषा भगवती सुरासुरदेवब्रह्मर्षिभिरभ्यर्थ्यमाननिमिषार्धमात्रसङ्गा प्रेमलक्षणा[2] भक्तिरुत्कण्ठितहृदया समाकाङ्क्षति[3] त्वदवलोकनाय । तत्त्वरतां महाराज[:] । इयञ्च नातिदूरे एतस्य सरसः पश्चिमतीरोपवने देदीप्यमाना महामणिमयमहासौधप्र[ा]कारप्रकरमयी चतुर्दशभुवनभवनातिग[परमशोभा] परमशोभा नाम मिहिरहिमकरकोटिकान्तिप्रचयवप्रचया विरिञ्चिवृषभध्वजाभिवाञ्छितवासप्रवेशा निखिलदुर्गमदुर्गसहस्रवलयवती महती[4] पुरी" इति समाकर्ण्य पीयूषसम्पातेनेव तेन सादरसरसाभिभाषितेनाप्यायितमनाः परदैवतधामेत्यनारूढतुरग एवाहूतानुचलिततुरङ्गमो यथाज्ञापयथेति प्रतिगृह्य स्वागतप्रमुखातिथिसपर्यापर्यायमग्रेसरैस्तैरेव दर्शितसरणिः प्रतस्थे ॥६४॥

ततश्चोभयपार्श्ववितत्तस्फटिकहाटकरजतालवालवकुलचम्पकरसालशालनारिकेलक्रमुकमयक्रमविरचितवीथीसहस्रप्रत्येकावरणकाञ्चनरजतमरकतपद्मरागमहेन्द्रनीलमयानत्युच्चप्राकारचयविराजमानामविरलसोपानपरम्परां पदवीमासादयामास ॥६५॥

1.Ms. ०माभाषितमिदमिति 2. Ms. ०क्षम० 3. Ms. ०ते
4. Ms. ०महतीमणिमय० 5. Ms. ०त्य०

अहो किमियमपूर्वोऽद्य [स]ञ्जातो मम चेतसः प्रसादो येना-
यमन्तरात्मा घनाभ्रंलिहमहामहीरुहव्यूहमये प्रचण्डगण्डपुण्डरीक-
मण्डलभल्लभुजङ्गमभीमभूतसञ्चयसञ्चारघोरतरे महाकानने महामेघ-
मण्डलीविवर्धितदुर्दर्शदर्शनिशीथसमयापादितदिङ्मोहान्धीभूतस्यै-
कलस्यै[व] सञ्चरतः सहसा महासहायभूतसहजबान्धवमहाजन-
समाजमयमहानगरासादनं, क्षुत्तृट्क्षामस्य प्रचण्डमार्तण्डसन्ताप-
सन्तापितस्येवाभिमतसुशीतलच्छायभवनपानभोजन[ा]सनशयन-
सम्प्राप्तिः, अदृष्टधनल[ा]भस्येव सहसा स्पर्शमहामणीन्द्रलाभः,
दुर्वासःशापप्रतापभीताया इव पाञ्चालतनयायाः प्रार्थिताद्भूत-
श्रीकृष्णचन्द्रचरणारविन्दद्वन्द्वसन्दर्शनं, ग्राहग्रस्यमानस्येव
गजेन्द्रस्य प्रार्थितपरमपुरुषासङ्गः, चतुर्दशहायनोत्तरं श्रीरामचन्द्र-
समागम इव श्रीभरतस्य, वाङ्मनसयोरप्यगोचरमतीवानन्दभरम-
नुभवति । तत् किन्नु खलु प्रभावोऽयं सरसोऽस्य, किं वास्य
प्रदेशस्याहोस्विदेतदधिदेवतायाः, किमथवा भगवत्या प्रेमलक्षणाया
भक्तथा इति सञ्चिन्तयन्तमेवैनमशरीरा वाणी पुनरपि प्रबोधया-
मास ॥६६॥

यथा—

आदौ श्रीलगुरुप्रसादवशतः शुद्धस्वभावं मही-
खण्डम्पश्यति तत्प्रभाववशतः सत्सङ्गसंज्ञं सरः ।
पीत्वैतत्सलिलञ्च याति पदवीं स्वान्तप्रसादाभिधा-
मायासच्युतिमुत्तरोत्तरमहानन्दन्ततो विन्दति ॥६८॥

अपि च

प्रत्यक्षीकुरु भूमिपाल पुरतः सम्पीड्यमानं महा-
भागं कञ्चन कैश्चिदद्य तु समासङ्गान्महत्यास्ततः ।

---

1. Ms. ०भं० 2. Ms. ०नस्ये० 3. Ms. ०तृ० 4. Ms. ०ह्मा०
5. Ms. ०ने० 6. Ms. ०न्न 7. Ms. ०खि० 8. Ms. ०द्म०
9. Ms. ०च्यु० 10. Ms. ०सा० 11. Ms. ०वः

मुक्तप्रायममुक्तबन्धनम[हा]प्रोद्दामकारागृहाद्
घोरात् पथ्यमपथ्यमेव सततं मन्वानमत्याकुलम् [1] ॥६६॥

इत्याकर्ण्य च पुनरतीवविस्मयविस्फारितलोचनः पुरतो विद्योतमानानेकवातायनमनेकविधद्वारमुपरिदोधूयमाननीलपताका[ा]मण्डल[ं] रथाङ्गद्वयालङ्कृतं महारथमारूढमसहायमसारथिमवाजिनमतिमनोहरं सुकुमारं कुमारमतिमहत्यातिजरत्यातिभयङ्करया वज्रायमाणातिदारुणारुणनीलशुभ्रकान्तिमहारज्जुत्रितयेन [2] संयतग्रीवं, निष्करुणदारुणेन च शर्वरीचरमिथुनषट्केन निरन्तरप्रहारव्याकुलीक्रियमाणम्, अग्रेसरमहाचञ्चलैकतरमहावञ्चकपुरुषानुयायिभिः पञ्चभिरतिविप्रलम्भकैः परुषपुरुषैश्चातिदीर्घतरातिदारुणदृढपाशैरेकैकशो बद्ध्वा प्रलोभ्य चैन्द्रजालिकविद्योपपाद्यमानघनान्धकारभरितगम्भीरवोभत्सविवरेषु निजनिजाभिमतेषु मुहुर्मुहुरभिनिपात्यमानं,दुर्वारदारुणश्व[ा]पदसञ्चारदुर्गमनिःसीमसुभीमगहने[ऽ]परिमितमधुकुसुमफलच्छायाप्रलोभनेन सञ्चार्यमाणम्, अन्तरा स्यन्दनमन्तरीक्षचरीं समस्तपरमवस्तुस्तोमनिधानभूतां जरामरणक्षुत्पिपासाधिव्याधिनिःशेषनिर्मूलनमहौषधिभूतमकरन्दसन्दोहभरितां जाज्वल्यमानज्योतिर्ज्वालाजालनिरस्यमानवाह्याभ्यन्तरीणदुरन्ततिमिरसञ्चारा[3]त्त[4]निद्रामम्लानिमनश्वरीं महासरोरुहवनीमन्धमिव रत्नदीपावलीमनासादयन्तं [तं] महाभीमान्धतमसे च परिभ्रमन्तं तदानीञ्च [5] सद्यो-विमुच्यमानप्रायजरतीगृहीतासितलोहितपाशद्वयतया विवर्धमानपरमानन्दपरम्परापरिचयविस्मयातिशयक्षुब्धमानसमिव विलोकयामास ॥६७॥

तदानीञ्च तत् सर्वमालोकयत एवास्य [6] स्वप्नमयमिवैन्द्रजालिकमयमिव प्रतिविम्बमयमिव निमेषमात्रेण सर्वन्तिरोबभूव ॥६८॥

---

1. Ms. मन्वान् ममत्याकुलम् 2. Ms. ०जा० 3. Ms. ०त्म० 4. Ms. ०ल्ला० 5. Ms. ०म० 6. Ms. ०प्र०

तदनन्तरञ्च तत्रैव—

विश्राम्याद्य पुरे मनोहरतरे श्रीप्रेमभक्त्या महा-
देव्यास्तां प्रणिपत्य तद्विरचितातिथ्येन पूर्णान्तरः ।
तत्कारुण्यवशेन पश्य सविधे विद्योतमानां श्रियं
श्रीवृन्दावनसंश्रयां श्रुतिगिरामत्यन्तदूरे स्थिताम् ॥७०॥

इत्याकर्ण्य च प्रणम्य तामनुषीं गिरं शिरसा बहुमन्यमान एवात्मान[ं] कुतूहलभरतरलमानसः प्रचुररोमाञ्चसञ्चयसञ्जारद्विगुणीकृतकलेवरः शनैः शनैर्व्रजन् पुरतः पुरमालोकयामास ॥६६॥

अपरिचितं रजसा तमसा च हिंसारोषादिभिरप्यखिलदूषण-
गोष्ठीभिः[1] सत्त्वगुणेन[2] च बहिर्द्वारप्रकोष्ठसंमार्जनाधिकारपरमप्रीतेन दूरत एव समुपास्यमानं हिमशैलमन्दरमेरुमहेन्द्रगन्धमादनमलय-हेमकूटप्रायसमुच्छ्रायैर्महाप्र[ा]सादैर्मन्दारहरिचन्दनप्रमुखानाममर-महीरुहाणामेकैकमयमहोपवनशतसहस्रापरिमितपरिखापरार्धपरिपाटीपरिवृतमतिशयितचतुर्दशभुवनं पवनदोधूयमानपताकाशतसहस्रको[टि]चुम्बितगोलोकभवनं[3] पुरमतिमनोह[र]म्प्रविवेश ॥७०॥

प्रविश्य च प्रतिद्वारनियमितैः प्रतीहारैरुपदिश्यमानमार्गो, वट्[4]ध्वा तुरङ्गममवान्तरद्वारसमीपविटपिमूलशाखायां, क्रमेणातिक्रम्य द्वारशतकोटीः, कोटीन्दुभानुसङ्काशे चतुर्दशभुवनाद्भुतमहामणिनिकरविराजमानमहासिंहासने नूतनदिव्यशुभ्राम्बरवितानविद्योतमाने विराचितासनां, सुरासुरसिद्धविद्याधरगन्धर्व-

1. Ms. ०ष्ठा० 2. Ms. ०ह० 3. Dr. Eggeling while analysing the poem in his Descriptive Catalogue of Sanskrit Mss. in the India Office Library, wrongly interprets the text here, since he writes "the king fancies himself to go to Goloka."

4. Ms. ०द्धा

गुह्यककिन्नररजनीचरचारणयक्षसुन्दरीभिः शतसहस्रकोटिपाण्डर-चामरैर्वीज्यमानचरणसरोजां, रजतमहारजतमौक्तिकमरकतपद्मराग-हीरकमहेन्द्रनीलमुखमहामणिनिवहविरचितविविधालङ्कारसञ्चार-हारिदेदीप्यमानमहावयवां सुधासुधाधाम[क]राधिकधवलाम्बरा-मचिन्त्यमहामहिममहनीयाममृतमयीमिव परमप्रेममयीमिव सु-षुप्त्यवस्थामयीमिव परब्रह्मानन्दसन्दोहसाक्षात्कारधारामयीमिव निखिलजनाखिलमनोरथमयीमिव वासवविरिञ्चिविश्वेश्वरमुखमुख-पङ्कजोदीरितस्तुतिशतसभाज्यमानाम्परमपु[रु]षार्थसार्थाधिकार्थप्रद-पदकमलाममलाकृतिचरिताम्भगवतीम्प्रेमभक्तिन्ददर्श ॥७१॥

ततश्च तत्तत्परमपरमाभीष्टपदार्थसार्थावलोकनानन्तर[ ] तत्-क्षणादेवोत्तरोत्तरविवर्धमानप्रबलपुलकान्नधारासारसञ्चारगद्गद-स्वरं कृताञ्जलिपुटः साष्टाङ्गप्रणतिस्तुतिसन्ततिभिः सपरिजनान्देवी-मतिसन्तोषयामास ॥७२॥

सन्तोषितमनसा देव्या स्वयमुत्थाय प्रणामपतितं भूमिपति-मुत्थाप्य दृढञ्च परिष्वज्य निर्भरनिःसीमपरमानन्दधाराप्यायितान्तः-करणं निस्पन्दसर्वावयवं मूर्छितप्रायं निजसिंहासनसविधे समुप-वेश्य समाश्वास्य च परिजनाहृतैः पीयूषाधिकस्वादुभिरपूर्वफल-मूलादिभिरमृतशिशिराधिकसुमधुरशीतलैश्च सत्सङ्गसरःसलिलैः सन्तर्पयामास ॥७३॥

अस्मै तु देव्या स्वयमुपनीतानि तान्यनास्वादितपूर्वाण्यास्वाद्या-सादितपरमतृप्तिरुत्थाय गत्वा बहिराचम्य पुनरपि देव्याः समीप-माजगाम ॥७४॥

---

1. Ms. ०सा० 1. Ms. ०र्था० 2. Ms. लक्षणाधिकोत्तरविवर्द्धमान०
3. Ms. ०ण्डा० 4. Ms. ०मा०

ततश्च देव्या[:] पर्यङ्कसमीपोपकल्पिततल्पान्तरे[1] तदनुरोधवशात् विनयतरेणातीवसङ्कुचितकलेवरो निषसाद ॥७५॥

तथा समासीनञ्च निजकरकमलेन लालयन्ती सप्रे[म]स्तिमित-मधुराक्षरमुवाच महादेवी यथा–"महाराज,मुक्तोऽसीदानीन्दारुणेभ्यः संसारपाशेभ्यः। अनादिजनिकोटिभिरनुशीलितास्मि भवता। मम तु भवानतीवप्रेमपात्रम्। अयञ्च पीयूषपाण्डरद्युतिमनोहरो[2] महारयो हयस्तेनैतेन पवमानमपि[3] न समानतया गणयामि किमुतैरावतमुच्चैः-श्रवसं वा। इममतिदवीयांसमसुलभममरसमाजस्यापि[4] मदीयाश्रम-[5]मनेनैवातिरंहसा सम्प्रापितोऽसि। नातःपरं निमिषार्धमपि विना भवता स्थास्यामि। त्वमतःपरं मयैव सहारुह्य मम महाविमानमनेन हयोत्तमेन संयोज्य सुखं विचरिष्यसि। श्वस्तु भवन्तं श्रीवृन्दावनं दर्शयिष्यामि। त्वमिदानीमत्रैव तल्पे सुखस्वापमुररीकुरु"। इत्या-करण्य सप्रणामाञ्जलिर्यथाज्ञापयति भगवतीति तच्चरणतलोपरचित-शयने सुष्वाप ॥७६॥

अनन्तरञ्च पूर्वाशासम्भोगसंक्रान्त[7]सिन्दूरकुङ्कुमलाक्षारसलोहि-तायमाने[8] भगवत्याशारमणे, मानवशान्म्लानचन्द्रमण्डलमुखायाम्पश्चि-माशायां[9] प्रमुक्ततारकानिकरव्याजकण्ठहारमुक्ताफलकलापखचित-[10]गगनाङ्गनायां, नीहारनीरविन्दुनिवहव्याजतदस्रकणजालस्तिमिते च महीवलये, कलहंसकोकिल[नील]कण्ठकलण्ठभाषितमिष[त]दीय-रोदनध्वाननिकरैर्भरिते च रोदसीविवरे, वहिर्द्वारप्रकोष्ठावस्थित-[11]साध्यसिद्धविद्याधरचारण[ग]न्धर्वैरुद्गीयमानेषु च देवीस्तुति-पुरस्सरजयशब्दमिश्रितप्राभातिकमङ्गलेषु, [मही]महेन्द्रः शयना-

1. Ms. ०न्ते० 2. Ms. ०रा० 3. Ms. ०र० 4. Ms. ०द०
5. Ms. ०भि 6. Ms. ०मऽ० 7. Ms, ०न्ते० 8. Ms. ०न०
9. Ms. ०न्मास० 10. Ms. ०यु० 11. Ms. ०के०

दुत्थाय[1] विहिततत्समयविधेयसपर्याविशेषः प्रणम्य च भ[ग]वत्यै[2] विधाय चानन्तरकरणीयानि सहतुरङ्गमः सत्सङ्गसरःसमीपमाजगाम ॥७७॥

तत्र चादृष्टचरमहामनोहररूपावयवान् प्रकटितविद्योतमानातिमहःसमूहानुमीयमानमहाप्रभावान्[3] वगाहनार्थमागतान् सुरासुरसिद्धविद्याधरकिन्नरगन्धर्वचारणान्[4] समालोकयामास प्रणनाम[5] तुष्टाव च मनसैव ॥७८॥

तैरपि सप्रेमादरस्मितमधुरभङ्गीभिः सभाज्यमानो निभृतमात्मगोष्ठीषु संकीर्त्यमानकुलकलापकौशलकीर्तिकर्तव्यविशेषः कृतावगाहनसन्ध्यावन्दनतर्पणपरदैवतपरिपूजन उत्थाय पुनरप्यागत्य देवीसकाशं तामपि पुष्पाञ्जलिभिरभ्यर्च्य कृतप्रदक्षिणप्रणामस्तुष्टाव ॥७९॥

सन्तुष्टया च तया निर्भरम्परिरभ्यमाणस्तदाज्ञया विहितपर्याणन्तमेव तुरङ्गमं तस्या विम[ा]नराजे संयोज्य देवीप्यमानमतिरमणीयन्तमेव देव्या सह समारुरोह । ततश्च वियति[6] शङ्खमृदङ्गभेरीनिनदपुरस्सरजयशब्दसम्बलितमङ्गलवचनानि शुश्राव ॥८०॥

निरन्तरनिपतितकुसुमासारमप्यालोकयामास [॥८१॥]

ततश्च तुरगराजरयजनितमहावेगेन विमानराजेन व्रजन्तमवनीपतिं तत्तद्देशप्रदेशान् सविशेषान् विज्ञापयामास भगवती ॥८२॥ यथा—

राजन् गौडमहीमतीत्य पुरतः पश्याङ्गदेशो महान्
एषा चम्पकमालिनी च नगरी कर्णस्य यासीत् पुरा ।
देशोऽयं मगधो विभाति पुरतो यस्मिन् गया गण्डकी
पुण्या चापि पुनःपुना विजयते भूलोकनिस्तारिणी ॥७१॥

---

1. Ms. ०दण्ड्याय 2. Ms. ०त्ये 3. Ms. ०द्द्यो०
4. Ms. प्रणमानाम 5. Ms. ०ष्ट्या० 6. Ms. ०म०

क्षेत्रं हारिहरं वदन्ति कृतिनः श्रीगण्डकीगङ्गयोः
सम्भेदं सुरसिद्धचारणगणैः संसेव्यमानं पुरः ।
अस्यैवोत्तरतो विभाति मिथिला नात्यन्तदूरे स्थिता
यस्यां श्रीयुतरामचन्द्रमहिषी प्रादुर्बभूव स्वयम् ॥७२॥

शोणम्पश्य महानदं नरपते तीर्थं महापावनं
पादं विन्ध्यमहीधरस्य विततं वामे समालोकय ।
धर्मध्वंसकरीं न[दी]ञ्च पुरतस्तां कर्मनाशां बुधा
याम्पश्यन्ति महाधियः समदशस्तीर्थं महापावनम् ॥७३

[1]तीर्त्वैनां पुरतः प्रपञ्चविटपिप्रोद्दामघोराटवी-
मूलोन्मूलनकर्तरीञ्च नगरीं पश्यान्धकध्वंसिनः ।
यां योगेन परेण यान्ति पदवीं कालेन संक्लेशिता-
स्तामेषा विदधाति जीवनभृतामन्त्यक्षणे [2]हेलया ॥७४

[3]पश्यैतं ध्वजमिन्दुमौलिनगरीलक्ष्मीकराम्भोरुहा-
[4]कारं श्रीयुतविन्दुमाधवमहाप्रासादमूर्ध्नि स्थितम् ।
अस्यालोकनमात्रतो जिगमिषोर्वाराणसीमुच्चकैः
प्रेमानन्दपरम्पराहितमहामूर्छा च संवीक्ष्यताम् ॥७५॥

श्रूयन्ताञ्च परितो वाराणसीमभिधावतां महाकवीनामनेकविधानि सुभाषितानि श्रवणीयानि । इति तत्तदाकर्णनसमुत्सुककर्णतया समुत्तस्थौ ॥८३॥ ततश्च

[5]भवोद्भूता सूते भवनिवहमेव प्रतिलवं
भवैकान्तप्रेमास्पदमपि भवध्वंसनकरी ।
अपूर्वा कापीयं चरमपरमानन्दपदवी
कदा भूयात् काशी मम नयनवर्त्मातिथिरपि ॥७६॥

1.Ms. तीर्णैतां 2. Ms. ०स्त्य० 3. Ms. ०नं 4. Ms. ०भ्रि०
5. Ms. ०न०

अनिर्वाणं ज्योतिर्दधदपि च निर्वाणमनिशं
न कालप्रारम्भं दधदपि महाकालविभवम् ।
कदा काश्याख्यानं पुरमपि पुरारिप्रियतमं
चिदानन्दाकारं नयनपथवर्तिं प्रभविता ॥७७॥

विधत्ते पाश्चात्यामतिरुचिरवेणीं लघयते
प्रभासप्रारम्भं[1] हसितविलसत्पुष्करमुखा ।
विलासिश्रीकण्ठा रुचिरमणिकर्णाभरणभृत्
प्रियेवान्या शम्भोर्मयि भवतु काशी सकरुणा ॥७८॥

उदञ्चद्वेदान्तध्वनिमधुपझङ्कारसुमनाः
परानन्दोद्रेकप्रणवनवसन्मञ्जरियुता ।
चतुर्वर्गाभिख्यप्रबलफलसञ्चारचतुरा
लतेव श्रीकाशी विघटयतु सन्तापमखिलम् ॥७९॥

त्रिलोकालोकाय स्फुरदुरुमहातारकतया
सदा नक्षत्रेशद्युतिदलितघोरान्धतमसा ।
दधद्[2]द्वन्द्वातीतस्फुरदुरुमहाचक्रसरसीं
निशेव श्रीकाशी कवलयतु सन्तापमखिलम् ॥८०॥

विराजन्त्यब्जेशद्युतिदलितदावानलरुचिः
स्फुरत्केदारश्रीर्[3]ज्वलदतुलरत्नेश्वरमही[4] ।
व्रजद्दुःखद्वन्द्वस्फुरदुरुमहाचक्रसरसी
दिवेव[5] श्रीकाशी शमयतु तमः सर्वजगताम् ॥८१॥

अकुण्ठं वैकुण्ठं परिहसति चारुद्युतिमिषा-
दपूर्वं पूर्वाद्रि[?] मलयमलयं यत् प्रतिदिनम् ।

---

1. Ms. ०म्प्रा० 2. Ms. It is hard to defend the use of **दधत्** here. A **पाठ** like **दधत्यद्वन्द्वातिस्फुरदुरुमहाचक्रसरसीं** is free from mistake 3. Ms. ०र्ज० 4. Ms. ०री० 5. Ms. दे०

तदेतत् काश्याख्यं नगरममितानन्दसदनं
कदाहं द्रष्टा[2]स्मि स्मरविजयिनः प्राणसदृशम् ॥८२॥

अनङ्गारि[3]प्रेयस्यपि जनसमूहं विदधती
सदानङ्गं तस्मै किमपि कमनीयं द[4]ददपि ।
पुरी काशी नेत्रभ्रमरनलिनी हन्त भविता
कदा भूयो दैवद्विपदलितबुद्धेः क्षणमपि ॥८३॥

लसद्दिव्याकाराः स्फुरदुरुगुणग्रामनिलयाः
समीहन्ते यस्मादिह विरतिमुदाममतयः ।
गुणातीतं हीनाकृति किमपि गन्तुं पदमहो
न विद्मस्तत् काश्यां किमिह परमं वस्तु वसति ॥८४॥

जनुर्धारामित्रं मतिमिह विहातुं कृतधियां
समूह[:] श्रीकाशीं श्रयति यदिमां कालभयतः ।
महाकालो यत्र प्रथयति महामृत्युपदवीं
पुनर्भूविश्रान्त्यै तदियमतिचित्रैकमहिमा ॥८५॥

कदाहं मध्याह्नद्युमणिकिरणोद्दीपितशिराः
प्लुतः स्वेदाम्भोभिः सरणिसरणव्यग्रचरणः ।
कियद्दूरे काशी पथिकमनुजानस्त्यनुपदं
वदन् भूयो भूयः श्रममपि विनेष्यामि निखिलम् ॥८६॥

श्रान्तः पान्थजनैर्[5]गङ्गुलिपरिक्षेपैः पुरः प्रेक्षितां
काशी[7] सौधकदम्बचुम्बितनभोलक्ष्मीमुखाम्भोरुहाम् ।
वीक्ष्योद्यत्पुलकालिपीवरतनुः प्रेमास्रधाराप्लुतो
भूयासं सहगामिनिर्भरपरीरम्भामृतैर्निर्वृतः ॥८७॥

---

2. Ms. द० 3. Ms. ०लङ्का० 4. Again an अपप्रयोग, सदानङ्गं तस्मै किमपि कमनीयञ्च ददती obviates the difficulty.
5. Ms. दे० 6. Ms ०स्या० 7. Ms. ०द्रा० 8. Ms. ०म० 9. Ms. ०स्य०

श्रीवाराणसि विश्वनाथनगरि श्रीनाथभक्तिप्रदे
श्रीकण्ठातिमनोविनोदजननि[1] श्रेयःश्रियां धारिणि ।
पञ्चक्रोशि करोषि पञ्चवदनं पञ्चत्वमात्रादहं
जल्पन्नेव कदा प्रणामनिवहैर्यास्यामि हास्यान्वितः[2] ॥८८॥

मदुद्भवदिनावधिप्रथितरोषमभ्युद्यतं[3]
प्रचण्डमपि पण्डय प्रवरदण्डमद्यान्तक ।
महादुरितसङ्घ[घ]या त्वमपि चित्रगुप्तोत्कतां
पुरी नयनगोचरीभवति मेऽद्य वाराणसी ॥८९॥

इत्यादीनि प्रेमार्द्रहृदयः शुश्राव ॥८४॥

ततो विमानादवतीर्य-राजन्, द्विजराजशेखरराजधानीं वन्दस्वावगाहस्व च श्रीमणिकर्णिकोत्तरवाहिनीसम्भेदे ॥८५॥

धन्यैषोत्तरवाहिनी विजयते स्वर्वाहिनी यन्महा-
माहात्म्यं कथयन्ति दैत्यरिपवो मन्दाकिनीरोधसि ।
सैषा श्रीमणिकर्णिका सुरधुनी यत्सङ्गमाकाङ्क्षया
तेपे दुश्चरमुग्रमद्भुततपो मन्वन्तराणां शतम् ॥९१॥

इति देव्याज्ञया सहैव तया विहितवाराणसीकृत्यकलापो देव्या [सह] पूर्वमलङ्कृतं विमानमारुरोह ॥८६॥

[ततः पुनरपि देवी प्राह स्म ।]

राजन् पश्य पुरः कलिन्दतनयास्वर्वाहिनीसङ्गजं
तीर्थं गुप्तसरस्वतीव्यतिकरं त्रैलोक्यनिस्तारणम्[4] ।
सम्प्राप्ते मकरं निदाघकिरणे ब्रह्मेशनारायणा
अत्रायान्त्यरुणोदये प्रतिदिनं स्नातुं समस्तामरैः ॥९२॥

इति । तत्रापि विमानादवतीर्य विहिततत्तीर्थकृत्यकलापः पुनरपि देव्या सह विमानमारुरोह ॥८८॥

---

1. Ms. ०निः 2. Ms. ०निलः 3. Ms. ०भ्य० 4. Ms. ०स्त्रै०

ततश्च पुनरपि सुविस्मयप्रेमार्द्रहृदया सपुलकास्रमङ्कुल्या[1] दर्शयन्ती देवी प्राह[स्म] ॥८६॥

प्राहुस्तारकमद्वितीयमहिम ब्रह्मेति मन्त्रं विभो-
र्यस्येशोऽपि विधाय साधनचयं मन्वन्तरैर्भूरिभिः[2] ।
सिद्धिम्प्राप[3] परां तदेव वितरन् काश्यां मुमूर्षोः श्रुतौ
निर्वाणं विदधाति योगनिवहैर्दुष्प्रापमत्यद्भुतम् ॥६३॥

तस्यैषा नगरी विभाति सरयूतीरे जगत्पावनी
राजन्नुत्तरतो विलोकय विभोः श्रीतारकब्रह्मणः ।
श्रीमद्भास्करवंशभूषणमहाराजस्य दूर्वादल-
श्यामोद्दामकलेवरस्य करुणासिन्धो रघूणाम्पतेः ॥६४॥

राजा तु तदाकर्ण्य समुज्जृम्भमाणमहाकुतूहलतरलमानसः सप्रणामाञ्जलिस्तस्मिन्[4] विमान एवोत्तिष्ठन् विलोकयामास ॥६०॥

ततश्च महाजवतया विमानराजो नानाजनपदानतीत्य सुदूरमनुससार ॥६१॥

ततश्च व्रजभुवनतमालतरुस्तोमसमेधमानमहामहीरुहव्यूहघनगहनाकारदुर्वारमहान्धकारावहेलनकुपित इव लोहितायमाने हेलिनि, निजगुरुगुरुकोपोपशमनानुगमनाय कलिन्ददुहित्रेवाम्बरतलमभिधावितेषु निजतरङ्गनिकरेष्विव[5] तिमिरपटलेषु, निजानुग्राहकनाथन्दिननाथन्तथाविधमवस्थान्तरमासादयन्तमवलोक्य समुत्पन्ननिर्वेदखेदतया विहाय सहचरीः प्रव्रजत्स्विव चक्रवाकनिकरेषु, प्रोषितपतिकतया मुद्रितपद्ममुखास्विव पद्मिनीषु, समीरसञ्चारनिपतितकुसुमासारतया शाखाविवरनिकेतनविविधविहङ्गमसङ्गकूजि[त]तया गलितबन्धननिबन्धननिपतत्परिणतफलजालतया च सायन्तनसपर्या-

1. Ms. ०मङ्गन्या 2. Ms. ०ति: 3. Ms. ०म 4. Ms. श्र० 5. Ms. ०षु in place of ०ष्विव

पर्यायम्पर्याचरत्स्विव द्रुमनिवहेषु, पशुपशिशुजालकाल्यमानानां[1] गवां धवलिमधारया[2] धवलीक्रियमाणधरामण्डलया[3] विडम्ब्यमानेष्विव सगरसन्तानसन्त्राणानुकम्पावर्धितरंहस्तरङ्गतरलेषु[4] भागीरथीस्रोतोनिकरेषु, पश्चिमाशाभिमुखमभिधावन्तीनाञ्च गवां हम्बारवैराह्वयमान इव तत्खुरजनितरजःपुञ्जस्य पूर्वाशाभिमुखस्य सन्ध्यारागारुणितस्य व्याजेन तत्क्षणमुदयाचलशिखरप्रस्थाप्यमानकरनिकर इव दिवाकरे, हंसयानहरिहरिणाङ्कतरणिविराजमानासु[5] [तरणिदुहितुरप्सु] सुरनगरसभास्विव, कालिन्दीतीरभूमिष्ठकमलकाननमपहाय तटतरुकुसुमसञ्चयमभि[6] गोपालजालविरचितसायन्तनानलबहलधूमपटलविजिगीषयेव धावत्सु भ्रमरसमाजेषु, तदुभयविजयस्पर्धया वर्धमानास्विव घनगहनमहीमहाश्यामिकासु प्रलयविशेषप्लवमानैः कालिन्दीपयःपूरैरिव प्लावितेषु रोदसीविवरेषु, अतितरविजृम्भमाणकैरवकाननसुविमलपरिमलगरिमनगरी[सी]मलङ्घनाय विहायसमुत्पतितेष्विव रजनिगन्धाकुसुमगन्धसन्दोहेषु, दीप्यमानास्विव वनदेवताभवनदीपावलीषु स्वल्पालपसमुन्मीलदमलदलासु चम्पककुसुमराजिषु, चिरविरहज्वरजर्जरनिर्जरराजहरिदनिकोपकलितचरणप्रहरणलग्नलाक्षारसलेपलोहितायमाने[7] च हरिणलाञ्छने, तारकानिकरव्यतिकरविराजमानगगनाङ्गनानुच्चिकीर्षयेव प्रकटितप्रोन्मीलदनेकविधविपुलकुसुमसमाजे, व्रजभुवनमण्डनायमानमहाकानने विमानादवतीर्य [देव्युवाच] "राजन्, सेयमशेषनिगमनि[ज]गर्वनिवहानिर्वचनीयमहामहिमसमूहमहनीयतया मही परममोक्षमुख्योपायनिकायसप्तकमूर्धन्यभूतमथुरा[मण्डल]मण्डनायमानापि[8] परमपुण्यकेतनद्वादशारण्यवरेण्यवृन्दारण्यमयी ॥६२॥

---

1. Ms. ०न्य० 2. Ms. ०ला० 3. Ms. ०ध्वनिक्रियमाण०
4. Ms. ०णे० 5. Ms. ०ङ्क० 6. Ms. ०मिति
7. Ms. ०म० 8. Ms. ०नोऽ०

यत्र श्रीवृषभानु[भानु]तनयाप्रोद्दामलीलालसत्-
कल्लोलैस्तरलीकृतो विहरति त्रैलोक्यचूडामणिः ।
निर्मज्जे[ग्न]व रसार्णवेषु निभृतं नित्यं तपत्युच्चकै
राधावल्लभनाम तत्फलमपि प्राप्तः किमप्यर्थयन् ॥''६५॥

ततश्च श्रीवृन्दावनपरमशोभातिशयसमवलोकनजनितां गलिताञ्जनश्यामलितां त्रैलोक्यलक्ष्म्याः प्रेमास्रुधारामिव, तत्तदवान्तरभुवनविहरणचतुरकिशोरशिरोमणिमयशरव्यसञ्चार्यमाणां श्रीमद्वृषभानुतनूजाकटाक्षपरम्परामिव, व्रजभुवनपरमपरिमलपटलानुसारनिपतितां मन्दाकिनीकमलकाननमन्दारवनचरभ्रमरघोरणीमिव, सुमधुरमुरलीनिनादश्रवणद्रवितनिपतितां महेन्द्रपुरमण्डलमहेन्द्रमणिमण्डलीमिव, अतितरचतुरमनोहरमुरहरवचनामृतनिर्झरधारानिर्वाप्यमाणकिञ्चित्प्रणयापराधैधितप्रियतमाकोपदहनमहाधूमलेखामिव, निरन्तरविजृम्भमाणमहाविहाररसमयपरब्रह्मानन्दसन्दोहसाक्षात्करणविगलितनिखिलकरणान्तःकरणतया निःसहनिपतिततनूलतायाश्चतुर्दशभुवनाधिदेवतायाः स्खलितनिपतितां कवरीमिव, क्रीडाविनोदनाय महेन्द्रेण सम्प्रेषितां मन्दाकिनीमहानीलोत्पलगहनपरम्परामिव, श्रीराधावयवपरमसौन्दर्यलहरीपरमपरिचयातिशयसमुचितप्रेमविशेषद्रवितनन्दनकलेवरललामलावण्यधारामिव, श्रीराधामाधवचरणसरोजराजसभाजनाय पातालतलनिलयसपरिवारवैरोचनिकरनिकरसमुद्धूयमानां मेचकचामरपरम्परामिव, विकचसरोजकैरवरक्तसन्ध्यकसौगन्धिकमुखकुसुमगन्धसन्दोहसञ्जनिताद्भुतसौरभसम्भारतया नागलोकलोकोपरचितां बहलकालागुरुधूमलेखामिव, निखिलभुवनवनदेवताभिरुपचरितां श्रीवृन्दावनवसुन्धरायाः प्रसाधनदिव्याञ्जनपुञ्जमञ्जुलसारङ्गमदमयमहापत्रलेखामिव,

---

1. Ms. ०न्दो० 2. Ms. ०णी० 3. Ms. विरहति 4. Ms. ०मा०
5. Ms. ०म्व० 6. Ms. ०द्धू०

[1]सुविकचकुसुमकोकनदहल्लककल्हारसहस्रदलकमलततसमुदित-
विविधतारा[तारा]पतिमतुलाम्प्रणतिनिपतितां नभःस्थलीमिव, कवि-
निवहोपवर्ण्यमानमात्मनः[3] श्रीराधाकेशपाशकेशवकायसादृश्यमत्यन्त-
विसदृशमित्यपराधवाधितमात्मानं मन्यमानाम्प्रणतिनिपतितां महा-
मेघमण्डलीमिव, प्रलम्बमानप्रलम्बदानवनिधनावसरसमेधमानमहा-
कलेवरस्य नीलाम्बरस्य स्खलितनिपतिताम्बरलक्ष्मीमिव, निराकृत-
पुष्करप्रभावामपि पुष्कराक्रान्तां, पावनसलिलामप्यशुचिजलां, प्रबल-
वाहिनीमपि भङ्गतरलाम्, आप्यायित[ा]श्वासितजगतीमपि काल-
रूपां, कृतान्त[4]सोदरामपि पातकभयध्वंसिनीं, चण्डांशुसम्भवामपि
सुशीतलां, कृष्णामपि विशदां, दृश्यमानाधोभुवनामपि गम्भीरां,
सत्त्व[5]बहुलामपि तमोमयीमिव दृश्यमानां, सगरसन्ततिपरमनिर्वृति-
हेतुभूतामपि न भीष्मजननीम्, अत्रान्तरा सरसश्रान्तश्रीराधामाधव-
श्रम[नीर]शीकरनिकरव्यतिकरविवर्धमाननीरपूरां, निरन्तरनिर्भर-
निपतद्[6]गोवर्धनशैलेन्द्रनिर्झरनीरधारासारघनभात्कारारवक्षुभितमीन-
मकरशिशुमारकुम्भीरचक्रान्दोलितगम्भीरनीरपूरां, तरलमहातरङ्ग-
मालाचुम्बिताम्बरविवराम्, अतिगम्भीरजलां कालिन्दीन्ददर्श ॥९३

सम्भूता दिननायकाद्भगवतस्त्रैलोक्यचूडामणे
रासश्रान्त्यपनोदिनी मुररिपोः श्रीराधिकाया अपि ।
तत्तत्क्रीडनकुञ्जपुञ्जरुचिरश्रीतीरभूमण्डला
सेयं श्रीयमुना पुनाति जगतीं तीर्थौघचूडामणिः ॥९६॥

अपि च

पीतान्यञ्जलिभिः स्वयम्भगवता रामेण सञ्चारण-
श्रान्तेनेव[8] गवां पयांसि मधुराण्यत्यर्थशीतान्यपि ।
यस्याः सङ्गवशात् प्रयागमतनोत्तीर्थाधिराजं पुरा
देवानान्तटिनी विभाति यमुना सेयं जगत्पावनी ॥९७॥

---

1. Ms. सुकविकच० 2. Ms. ०न० 3. Ms. ०ना 4. Ms. ०न्ति०
5. Ms. ०त्व० 6. Ms. ०निपतितद्० 7. Ms. ०य० 8. Ms. ०नापि

स्वनीरकृतमज्जनप्रचुरगोपसीमन्तिनी-
तनूततितडिल्लताप्रचयचारुसञ्चारिणी ।
धरावलयलम्बिनी किमु नवीनकादम्बिनी
कलिन्दगिरिनन्दिनी पतितपावनी पातु नः ॥९८॥

प्रतीरतरुमूलभूनिलयराधिकामाधव-
स्फुरच्चरणल[ा]ञ्छनप्रचुरमाधुरीचुम्बिनी ।
व्रजक्षितिविहारिणी विविधतापसंहारिणी
कलिन्दगिरिनन्दिनी पतितपावनी पातु नः ॥९९॥

महेन्द्रमणिमण्डलीकिरणधोरणी किं स्फुर-[1]
न्महामरकतस्थली किमथ नीलपद्माटवी ।
नवाञ्जनमहीधरद्रवविडम्बिनी सर्वदा
कलिन्दगिरिनन्दिनी पतितपावनी पातु नः ॥१००॥

वृषारिवृषभानुजाचरणचारिचन्द्रावली-[3]
मयूखपरिरम्भिणी व्रजसुधारसास्वादिनी ।
स्मरद्रुमविनाशिनी रसपयोधिसंवर्धिनी
कलिन्दगिरिनन्दिनी पति[त]पावनी पातु नः ॥१०१॥

महाविषयवासनाविषमनागपाशावली-
कठोरतरबन्धनव्यथितजीवनिस्तारिणी ।[4]
तरङ्गतरलीकृताम्बुजवनी[5] मनोहारिणी
कलिन्दगिरिनन्दिनी पतितपावनी पातु नः ॥१०२॥

इति तुष्टाव च । ततो विमानादवतीर्य स्वयमवगाह्य राजानमप्याज्ञापयामास । राजा तु यथाज्ञापयति भगवतीति सप्रणामादरमवतीर्य वगाह्य विहितसायन्तनकृत्यकलापः कमपि परमानन्दमभि-

1. Ms. ०नी० 2. Ms. ०लीं 3. Ms. वि० 4. Ms. ०वि०
5. Ms. ०णी०

नवमनुबभूव। पुनरपि तथैव स्वान्तप्रसादभूमौ दृष्टचरं सुकुमारं कुमारं रथमारूढं बहुभिर्बाधितपूर्वं सम्प्रति विगलितजरतीगृहीत-पाशद्वयमवशिष्टतदालम्बितशीर्णप्रायैकसितपाशं रथस्थमप्यस्पृष्ट-रथमिव समुन्मज्जन्तं ददर्श ॥९४॥

क्षणेन च तत्सर्वं तिरोबभूव। राजा तु जिज्ञासुरपि तद्विशेष-वृत्तान्तं सहसा तत्सर्वमेव विसस्मार। ततश्च दूरत एव केनचिद-धीयमानां कामपि स्तुतिगाथां शुश्राव ॥९५॥

यथा।

सान्द्रानन्दभरातिमन्थरतरैरिन्द्रादिवृन्दारकै-
रम्भोजासनशङ्करप्रभृतिभिर्यध्रियन्त्यते सन्ततम्।
जीयाद्विश्वशरण्यचारुचरणद्वन्द्वारविन्दद्वयो
वृन्दारण्यवरेण्यसागरविधुर्गोविन्ददेवप्रभुः ॥१०३॥

तालीतालतमालजालरुचिरे शालव्रजालङ्कृते
गुञ्जन्मञ्जुलिपुञ्जकुञ्जभवने वृन्दावने सम्प्रति।
यः संसारयते पुराणचरितं स्वीयं पुराणोदितं
भक्तानां जयति त्रिलोकतिलको गोविन्ददेवप्रभुः ॥१०४॥

यद्वेदान्तनितान्तसूक्ष्मविलसत्सिद्धान्तसन्तानकै-
र्मृग्येतापि यमीन्द्रमानसचयै रात्रिन्दिवं यत्नतः।
तद्रूपं किमपीह लोचनपथं दीर्घानुकम्पावशा-
न्निन्ये स्थूलदृशामसौ विजयते गोविन्ददेवप्रभुः ॥१०५॥

यः श्रीमद्वृषभानुजान्तरचरः प्रेमाम्बुधेश्चन्द्रमा
नित्यं [यः] किल भानुजातटमहारत्नावतंसाकृतिः।

---

1. Ms. ष्टं 2. Ms. has one redundant न after क्षणेन
3. Ms. ०वि० 4. Ms. गुञ्जन्मनिञ्जनिपुञ्ज० 5. Ms. reads मृग्यै०

यश्चन्द्रावलिसान्द्रसन्ततमहामानान्धकारोत्कर-
ध्वंसी भानुरसौ[1] व्रजे विजयते गोविन्ददेवप्रभुः ॥१०६॥

राजा तु सादरं प्रेमस्तिमितमाकर्ण्य सगद्गदं भगवन्तं गोविन्द देवं प्रणनाम । इदमचि[न्त]यच्च ॥९६॥

अहो !

मान्यो[2]ऽगण्यसुपुण्यजन्यमहिमा धन्यो वरेण्यः सतां
यः स्वान्तेऽपि सकृत् करोति सुकृती यस्यार्चनं भक्तितः ।
कालिन्दीसलिलावगाहनवशात् पूतात्मनां तत्पद-
द्वन्द्वाराधनवत्[3] परं[4] सुकृतिनां किं वा[5]ऽपरं ब्रूमहे ॥१०७॥

अहो वृन्दारण्यप्रभवनवकुन्दादिकुसुमै-
रमन्दैर्वासन्तीवकुलकुमुदेन्दीवरचयैः[6] ।
समाराध्य श्रीमद्व्रजभुवनरत्नाकरविधुं
कृतार्थानां ब्रूम[:] कमिह महिमानं कृतधियाम् ॥१०८॥

ततो निखिलदेवर्षिब्रह्मर्षिभिर्दैवतदानवादिभिः[7] प्रभा[स]पुष्कर-मुखैश्च[8] मूर्तिमद्भिर्दशकोटिभिरन्तरीक्षद्यौरिस्वर्लोकनिकेतनैर्महातीर्थै-र्विरचिताञ्जलिभिः सप्रणामैर्दूरत एव संस्तूयमानमतिमहनीयमहा-महिममहःपुञ्जमयमिव निखिलपावनपदार्थसार्थसारमयमिव पुण्य-द्रुमनिर्यासमयमिव[10] पीयूषपाथोनिधिमन्थनजनितनवनीतरसमयमिव[11] श्रीराधामाधवप्रेमरसमाधुरीपूरपूरितमिव भूषितभूखण्डं श्रीराधा-कुण्डं श्रीश्यामकुण्डञ्च ददर्श ॥९६॥

---

1. Ms. भानुभानुरसौ 2. Ms. मान्यगण्य० 3. Ms.०त० 4. Ms. ०रां 5. Ms. ०वा परं० 6. Ms. ०व्रं० 7. Ms. ०वान्द्रिः० 8. Ms. ०खे० 9. Ms. ०भि० 10.Ms. ०म० 11. Ms. ०सं०

ततो देव्याज्ञया तयैव सह प्रथमं श्रीराधाकुण्डे तदनु श्यामकुण्डे च ममज्ज ॥६७॥

तत्र च तमेव कुमारमुन्मज्जन्तं गलिताखिलबन्धनं ताञ्च वर्षीयसीं तान्यपि रात्रिञ्चरमिथुनानि सर्वमेव भस्मीभूतं तानपि षट्पुरुषानस्य[1] दासीभूतान् निजमपि तुरङ्गमं तस्मिन् देव्या[2] विमाने विलीयमानन्ददर्श ॥६८॥

ततो विस्मयविस्फारितलोचनो न किमपि ददर्श केवलं भगवतीं तञ्च विमानराजं ददर्श ॥६९॥

ततश्च विस्मयानन्दभरमन्थरहृदयो विहिताञ्जलिस्सप्रणामं भगवतीं पप्रच्छ ॥१००॥

"भगवति, कोऽयमतिसुकुमारः कुमारो रथमारूढोऽतिमहत्या जरत्या सितासितलोहितैर्वज्रनिष्ठुरै[3]स्त्रिभिरतिदीर्घरज्जु[4]भिः संयमितग्रीवो दारुणेन च रात्रिञ्चरमिथुनषट्केनाग्रेसरीकृतवज्रकपुरुषपञ्चकेनातिचञ्चलेनैकेन च सकलाज्ञापकेन सर्वाग्रे सञ्चारिणा बहुधा विप्रलोभ्य सम्पीड्यमानः शुद्धस्वभावभूमौ दृष्टपूर्व[ो] विगलितप्रायासितलोहितरज्जुद्वयो रथान्तराले चास्पृष्टरथं किमपि कमनीयं कमलकाननं तेनाप्यनुपलभ्यमानं तदानीञ्च गन्धर्वनगराकारतया मदीयतद्गतसंस्कारेण सहैव तिरोबभूव। तञ्च पुनरपि कालिन्दीसलिलावगाहनानेहसि समुन्मज्जन्तं विशीर्णप्रायजरतीगृहीतसितैकपाशं विगलितासितलोहितपाशद्वयं रथारूढमप्यस्पृष्टरथमिव देदीप्यमानं दृष्टवानस्मि। त[त्] तर्हि तर्हि च समये जिज्ञासोस्तद्गतसंस्कारमादायैव तिरोबभूव। तञ्च पुनरप्यत्र

---

1. Ms. ०नूऽस्य 2. Ms. विद्यमाने 3. Ms.०ज० 4. रज्जु is feminine, but त्रिभिः and वज्रनिष्ठुरैः are masculine; दाममिः may do. 5. Ms ०लो

कुण्डद्वये विहितावगाहनं विगलिताखिलबन्धनं ताञ्च जरतीं तान्यपि मिथुनानि भस्मीभूतं सर्वमपरांश्च कठोरपुरुषान् विनयावनता[न]स्य दासीभूतान् पश्यतो[1] मम स तुरङ्गमो दृश्यमान एव भगवत्या विमानराजे विलीनः तच्च कुमारादि[क]मखिलमेव तिरोभूतम्। तदनुगृह्णात्वाज्ञापयतु भगवती कोऽयमतिसुकुमार[:] कुमार[:], का वा सा जरती, के च ते सितासितलोहिताः पाशाः, कानि वा तानि कर्बुरमिथुनानि, के च ते वञ्चक[ा]: पञ्चपुरुषाः, कश्च तेषामग्रेसरोऽतिचञ्चलः पुरुषः, किं निमित्तञ्चानेकैरेक एवासहायो बहुबाध्यमान आसीत्[2] सः कुमारः, कश्चास्य रथो निरश्वो निःसारथिरनेकवातायनो बहुद्वार[:], किञ्च[3] तत्तेजोमयमाश्चर्यभूतमम्भोजकाननम्, कथञ्च मुक्तबन्धनः सः, कथमेतेऽपि भस्मतामपरे च दासतामायाताः, कथं वा मदीयस्तुरङ्गमो भगवत्या रथ एव दृश्यमानो विलीनः, स चापि कः, स च कुमारः कथ[मन्त]र्हितः, क्व वा वर्त्तते[4]दानीम्। यदि दासजनपरम्परापरिगणनीयतयानुकम्पनीयोऽयं तदाज्ञापयतु सविशेषवृत्तविवरणेन" इति पादयोः पपात ॥१०१॥

ततश्च प्रेमस्तिमितहृदया देवी प्रणतमवनीपतिमुत्थाप्य निर्भरमालिङ्गथ प्रत्युवाच ॥१०२॥

यां मायां समुदीरयन्ति कृतिनोऽनाद्यामविद्यां तथा[5]
सेयं घोरतराकृतिः सुमहती वर्षीयसी वीक्षिता।
कामाद्याः षडमी रतिप्रभृतिभिः पञ्चापि बुद्धीन्द्रिया-
ण्येषामग्रसरं मनोऽतिचपलं क्ष्मापालचूडामणे ॥१०६॥

प्राहुः सत्त्वरजस्तमांस्यपि गुणांस्त्रीन् दारुणान् दुस्त्यजान्
पाशान् विद्ध[य]तनूनथो तनुमिमां जानीहि चित्रं रथम्[6]।
तत्रानेकतनूजकूपकुहरैर्वातायनैरिन्द्रिय-
द्वारद्वारचयो विभाति नृपते पादौ रथाङ्गद्वयम् ॥११०॥

---

1. Ms. ०त्
2. Ms. सु०
3. Ms. ०श्चि०
4. Ms. ०म०
5. Ms. ०नो नाद्या०
6. Ms. ०मथा०

बद्धन्तत्र विचेष्टमानमनिशं निष्कारणद्रोहिभि-
[1]र्दुवारैरपि पीड्यमानमवशं तैरेव रात्रिन्दिवम् ।
[2]स्वात्मानं समवेहि पङ्कजवनीं तत्रापि तेजोमयीं
षट्चक्राणि सुपक्वसाधनमहायोगीन्द्रगम्यान्यपि ॥१११॥

[3]चेतस्ते नृपते तुरङ्गमवरस्तेनासि सम्प्रापितः
सारङ्गेण च केनचिन्नरपते सत्सङ्गसंज्ञं सरः ।
[4]तत्र च्छिन्नरजस्तमाः प्रकलयन् सत्त्वैकपाशं पुनः
कालिन्दीसलिलावगाहगलितप्रायं स्वयं [5]दृष्टवान् ॥११२॥

श्रीराधाश्यामकुण्डान्तिकभवनसमासङ्गतस्तञ्च पाशं
छिन्नं चेतस्तुरङ्गं मिलितमपि महासाधनाख्ये रथेऽस्मिन् ।
[6]आलोक्याऽवेहि सद्यो दलितकलिमलन्तीर्णसंसारसिन्धुं
जीवन्मुक्तं कृतार्थं स्वमपि नरपते नास्त्यतः प्रार्थनीयम् ॥११३॥

[7]भस्मीभूतमनोजमत्सरमदक्रोधादिदोषोत्करो
मुक्ताशेषदुरन्तबन्धनचयः स्वाज्ञाविधेयेन्द्रियः ।
[8]जीवन्मुक्तिमुपागतोऽसि नृपते नातः परं कर्मणां
[9]सामर्थ्यं त्वयि किञ्चिदङ्कुरलवप्रोद्भेदनेऽपि ध्रुवम् ॥११४॥

[10]वृन्दारण्यरहस्यमेवमपरं लीलाविलासाद्भुतं
प्रत्यक्षीकुरु तुभ्यमक्षियुगलं दिव्यं ददान्यद्भुतम् ।
नैतत् स्थूलदृशां [नृणाञ्च नयना]तिथ्यं कदापि व्रजे-
दित्याभाष्य तदा ददौ नृपतये देवी सुदीप्तेक्षणे ॥११५॥

आकीर्णं सुमनोमनोहरमहासन्तानसन्तानकैः
श्रीवृन्दावनरासमण्डलमहीहारायमाणं पुरः ।

---

1. Ms. ०दु० 2. Ms. ०वै० 3. Ms. ०स्तु० 4. Ms. छि० 5. Ms. दृच्च० 6. Ms. ०वै० 7. Ms. ०षा० 8. Ms. ०न्मुक्तिमुक्ति-मुपागतोऽसि 9. Ms. ०न० 10. Ms. ०मद्य०

रम्यन्तत्र ददर्श काननमतीवाश्चर्यरूपन्ततः
कूजत्कोकिलकेकिषट्पदकुलं क्ष्मापालचूडामणिः ॥११६॥

ततश्च पारिजातचन्दनहरिचन्दनसन्तानमन्दारकल्पद्रुमाणां रसालशालचम्पकाशोककदम्बकाञ्चनपुन्नाग[नाग]केशरकुरुवकवकुलवकिंशुकजम्बूजम्बीरवरुणकरुणपीतशालार्जुनाञ्जनतिलककेतककेतकीनामेकैकमयवलयविभ्रमाणि विततानि महाकाननानि देव्या सह समालोक्यालोक्य सुदूरमनु[स]सार ॥११७॥

तदनु काञ्चन काञ्चनशाखिना[1]-
न्ततिमतीवमनोहरपल्लवाम् ।
घनकलापकलापसमुज्ज्वलां[2]
परभृतै[रभृतै]रभिघोषिताम्[3] ॥११७॥

नवकदम्बकदम्बविराजितैः
सुमुकुलैर्वकुलैर्विरवाकुलैः[4] ।
विपुलशालविशालमहीरुहां
घनवनीं नवनीरदसन्निभाम् ॥११८॥

विततमालतमालतमोमयीं
द्रुमनिशामनिशास्तमितप्रभाम्[5] ।
विषमसायकसायकभीषिता
विविशुरुत्कदृशां सुदृशां[6] गणाः ॥११९॥

अपि वतंसयति स्म विसारयन्
रुचिरमंशुकमंशुकविस्तरम् ।
नवघनाघनकाशनकेशवं[7]
हिमकरो मकरोज्ज्वलकुण्डलम्[8] ॥१२०॥

---

1. Ms. ०श्मि० 2. Ms. ०ज्व० 3. Ms. ०ष० 4. Ms. स्व०
5. Ms. ०न्त० 6. Ms. स० 7. Ms. ०न० 8. Ms. ०ज्व०

[1]समधुनी-तमधुनीतटभूरुहां
सुमनसां निवहानिव हापयन् ।
मधुपसङ्गमसङ्गतमुच्चकैः
सुनिगमो निगमोपममारुतः ॥१२१॥
अनिलचञ्चलशाखिदलान्तरै-
र्विगलितो बहुधा हिमदीधितेः ।
अनुकरोति [2]करोऽतिसमुच्छ्रयं
किमु रुचामुरुचामरजन्मनाम् ॥१२२॥
स्फुटसरोजसरोजलशीकर-
व्यतिकरस्तिमितो वनमारुतः ।
व्यतनुतातनुतापितचेतसां
व्यजनतां जनताम्परिमुच्य ताम् ॥१२३॥
सहरिचन्दनचन्दनकाननं
स्फुरदनल्प[सकल्प]महीरुहाम् ।
विजितकेशरकेशरसौरभं
वनमलोकत लोकतमो[3]ऽपहम् ॥१२४॥
घनवनीनवनीलमहामणि-
प्रचुरसौधमहानगरान्तिके ।
तुहिनदीधितिदीधितिसञ्चयः
स्फुटमराजत राजतभित्तिवत् ॥१२५॥
ततो मणिमयीं मही[म]तिमहीयसीं सर्वतो-
विसारिनवहाटकप्रवरवप्रसुप्रावृताम् ।
कदम्बतरुभिस्तथा वकुलभूरुहैर्भूषितां
महारजतविद्रुमस्फटिकसौधज[ा]लो[4]ज्ज्वलाम् ॥१२६॥

---

1. A. metrical irregularity, there being thirteen letters in this line instead of twelve. **तमधुनीमधुनीतटभूरुहां** may do. 2. Ms. **करोति**॰ 3. Ms. ०पो० 4. Ms. **ज्व**

क्वचिन्नवनवोदि[त]द्युमणिबिम्बकोटीशत-
प्रभाः क्वचन रोहिणीरमणबिम्बपुञ्जोपमाः ।
क्वचित् प्रवलदुर्दिनाद्भुतकुहूनिशीथद्विषः
क्वचित् प्रचुरचञ्चलाचटुलकान्तिकान्तार्चिषः ॥१२७॥

ददर्श नृपसत्तमस्तदनु चारुसौधावली-
द्विजैः श्रुतिमनोहरोच्चरणचारुभिः पूरिता[:] ।
ततो भरितरोदसीविवरमध्यभागम्पुरो
निराकृतदिनक्षपं कमपि तेजसां सञ्चयम् ॥१२८॥

एकन्तप्तसुचारुकाञ्चनमहासौदामिनीसञ्चय-
च्छायञ्चापरमिन्द्रनीलजलदप्रायन्तदेतत् पुरः ।
तेजोद्वन्द्वमतीव राजतितरां दूरीकृतान्योदयं
शङ्के चाव्ययमद्वितीयममलं ब्रह्मेदमेव ध्रुवम् ॥१२९॥

इत्यानन्दपरम्परामनुभवन् प्रेमास्रधारामहो-
रोमाञ्चाञ्चितकाययष्टि विपुलं संवीक्ष्य दिव्येक्षणः ।
कोटीन्दुद्युमणिद्युतीन् सुनिभृतान् सत्कल्पवल्लीमयान्
कुञ्जानम्बरचुम्बिनो मणिमयप्रोद्दामवेदीभुवः ॥१३०॥

तेषामेकतमत्र मेरुशिखराकारं सुरद्रुमारुहं
व्योमव्यापिनमत्र मण्डनचयानूर्ध्वोर्ध्वतः संस्थितान् ।
एकैकत्र सविद्युदम्बुदमयीं मालां मनोहारिणीं
गौरश्यामलकोमल[मल]महाकान्तीः समातन्वतीम् ॥१३१॥

तमालतरुमण्डली तरुणहेमवल्लीचयैः
किमिन्द्रमणिमण्डली नवहरिन्मणिश्रेणिभिः ।
नवीनघनमण्डली किमु तडिल्लतासञ्चयै-
रितिप्रचुरशङ्कया तरलितं मनो भूपतेः ॥१३२॥

---

1. Ms. ०म० 2. Ms. ०ह्ला० 3. Ms. ०ञ्च० 4. Ms. ०ह्० 5. Ms. ०रि० 6. Ms. ०श्च्या०

तत्रोद्दामकिरीटमण्डनमहारत्नद्वयीमद्वयीं
गौरश्याममयूखपुञ्जखचितब्रह्माण्डभाण्डोदरीम् ।
एकीभूततनुं मिथो भुजलतासंयम्यमानोभय-
ग्रीवां रिङ्गदपाङ्गभङ्गिविशिखैः प्रोच्चैर्मिथो निघ्नतीम् ॥१३३॥

दीप्तां काञ्चन काञ्चनव्रततिकां तत्रापि पूर्णं विधो-
र्बिम्बं चारुफलं नवाम्बुदघटाकीर्णं लसद्विद्रुमम् ।
चञ्चच्चञ्चलखञ्जरीटयुगलं तत्रोल्लसत्ताण्डवं
भूपालः समलोकयत् किमिति च प्रोच्चैर्वितर्काकुलः ॥१३४॥

च्युतमिवाङ्कगतं शरणागतं
हरिणशावमसौ व्रजकानने ।
अनुसृतोऽद्य विहाय विहायसं
जयति पूर्णसुधाकरमण्डलः ॥१३५॥

किमथ मध्यमवेक्ष्य मृगाधिपं
समभिशङ्कय तदङ्गकुरङ्गकः ।
इह ममज्ज सुधाकरमण्डले
स्फुटविशालविलोलविलोचनः ॥१३६॥

विहरणं बहुधा बहिरत्र किं
व्यतनुतामवहिश्च समीहितुम् ।
श्रुतिपथं निभृतं समुपाश्रितौ
विचरतो वरलोचनखञ्जनौ ॥१३७॥

अधृतमौर्वितयेव मुरद्विषः
परिभवातिविजृम्भि[त]गौरवम् ।
विजयते किमपीह मिषाद्भ्रुवो
धनुरनन्यजनेर्मणितोरणम् ॥१३८॥

---

1. Ms. ०स्यो० 2. Ms. वि० 3. Ms. सु० 4. Ms. ०द्रु

श्रुतिमनोहरनिस्वनहेतुभि[:]
सुनिभृतैर्यदसौ समुपास्यते।
द्विजगणैः सततं द्विजराजता
विजयते तदमुष्य सुनिश्चितम् ॥१३९॥

रससुधाम्बुनिधौ वदनाम्बुजे
स्मितमहोर्मिचयैस्तरलात्मनाम्।
मकरकुण्डलिनामतिमज्जनं
किमतिचित्रमचिन्तयदित्यपि ॥१४०॥

स्मरविजित्वरमोहनमोहिनी-[1]
तनुभृतोऽपि मनोऽतिविमोहनम्।
किमपि रूपमिदं वृषभानुतः
समुदितं न गिराम्पथि वर्तते ॥१४१॥

हरिनखाङ्कुरदारणनिःसृत-
प्रचुरमौक्तिकवारणकुम्भकम्।
इव सुमेरुतटं तदुरुश्रम-[2]
प्रभवबिन्दुसुचारुपयोधरम् ॥१४२॥

मञ्जीराङ्गदहारकङ्कणमहाकेयूरकाञ्चीझनत्-
कारस्फूर्जथुगर्जितं श्रमपयःसङ्घातसम्पातनम्।[3]
व्यामर्दत्रुटितोरुहारलतिकाविस्रंसिमुक्ताफल-[4]
व्याजोद्यत्करकातिवर्षमभवच्चित्रं महादुर्दिनम् ॥१४३॥

श्रीराधाश्रवणावतंसनलिनघ्राणच्छलादाननं[5]
तस्याश्चारुकपोलमूलसरणिं सञ्चारयत्यच्युते।
शङ्के वारयितुं रुषा परुष[य]ा सुप्तोत्थिता प्रोच्चकै-
स्तीक्ष्णा द्वारचमूस्तनूरुहततिव्याजा सम[ं] भ्राजते ॥१४४॥

---

1. Ms. ०वे० 2. Ms. ०द्र० 3. Ms. ०म्पा० 4. Ms. ०र्द्र० 5. Ms. ०छ०

वीक्ष्यान्योन्यहृदन्तरे निजनिजच्छाये[1] पराशङ्कया-
न्योन्यं व्याक्षिपतोः किमुत्थितमिथःकायप्रवेशेच्छयोः ।
अत्यर्थं परिरम्भदम्भसमरारम्भाय संवल्गतोः
श्रीराधामुरवैरिणोः[2] स्मितसुधासारः सुखायास्तु[3] वः ॥१४५॥

यां मूलप्रकृतिं वदन्ति निगमाः सर्वेश्वराधीश्वरी-
माद्यां शक्तिमुदीरयन्ति परमां विद्यां तथैवागमाः ।
साराणामपि सारतामुपगता सूक्ष्मातिसूक्ष्माम्बिका
सेयं नन्दकिशोरजीवितमयी श्रीराधिका क्रीडति ॥१४६॥

लीलान्दोलनलोलमौलिविगलद्वेणीभरव्याजतः
किम्भाति [प्रति]बिम्बिता हरितनोरालिङ्गिताया द्युतिः ।
किं वा श्रान्त्यपनोदनाय यमुना व्रीडावती पृष्ठतः
प्रेम्णाप्याययितुं समागतवती श्रीराधिकायाः स्वयम् ॥१४७॥

किञ्च

समत्तं राधायाः पिबसि हरिवक्त्राम्बुजसुधां
सगर्वं राधेति स्फुटमभिदधाना मृदुमृदु ।
प्रियात्यर्थं तस्या अपि मुरलि यस्मादसि सखि
त्वमेवैका धन्या विहितबहुपुण्या त्रिजगति ॥१४८॥

अपि च

तव क्वाणे प्रोन्मीलति मुरलि निस्पन्दमखिलं
जगद्ध्यानारूढं स्थगितचकिताश्वो रविरपि ।
रवेः पुत्रीस्रोतो वहति विपरीतं पुनरसौ
द्रवद्ग्रावग्रामः परिणमति गोवर्धनगिरिः ॥१४९॥

इत्यादीनि च तत्र शुश्राव । ततश्च महीपतिः क्रमशोऽवलोकया-
मास विहरमाणौ[4] राधामाधवौ यथा—॥१०४॥

1. Ms. ०च्छा० 2. Ms. ०स्व० 3. Ms.०स्त० 4. Ms विहधारयमाणौ

क्वचित् सहजसुन्दरे नवनिकुञ्जसौधोदरे
विकाशिसुमनोमनोहरविचित्रतल्पान्तरे ।
मिथोऽतिपरिरम्भणामृतरसाब्धिमग्नान्तरौ
निमीलितविलोचनौ परमयोगभाजाविव ॥१५०॥

क्व चापि ललितादिभिः सहचरीगणैरावृतौ
मृदङ्गमुरजानकध्वनिभिरुल्लसत्ताण्डवौ[1] ।
परस्परकराङ्गुलिग्रथितपाणिपङ्केरुहौ
स्फुरन्मृदुमृदुस्मितौ मधुरहारिगीतामृतौ ॥१५१॥

क्वचित् पणितसस्पृहस्मितसुधारसप्रोल्लसत्-
सुचुम्बपरिरम्भणप्रमुखभूरिकेलीरसौ ।
सखीसदसि सस्पृहौ जयपराजयाभ्यामुभौ[2]
करोल्लसितपाशकौ निपुणमानसं दीव्यतः ॥१५२॥

क्वचित् प्रणयकोपितप्रियतमापदाम्भोरुह-
प्रपन्नमुरवैरिणो हितविधौ विशाखादिभिः ।
कृतस्तुतिसभाजनप्रणतिरीषदीषत्स्मितं[3]
तनोति वृषभानु[जा] नयनकोणलीलालवम् ॥१५३॥

क्वचिद्विषमसायकप्रचुरसङ्गराडम्बर-
श्रमातिविनिमीलितेक्षणसुनिःसहाङ्गीं प्रियाम् ।
विलोक्य तनुते स्वयञ्चरणचारुसंवाहनं
सुवीजयति चामरैरपि महापराधोपमः[4] ॥१५४॥

क्व चापि यमुनातटीनिभृतकुञ्जमध्यस्थले
तदीयलहरीचयप्रचुरशीकरैः शीतले ।
मिथः कथयतोः कथाः सपरिरम्भयो[:] शृण्वतो-[5]
रनादरवशादिव द्रुतमियाय दीर्घा निशा ॥१५५॥

---

1. Ms. ०रु० 2. Ms. ०भ्यां वभौ 3. Ms. कु० 4. Ms. ०ध्वो०
5. Ms. ०न्न०

वेणीपूततनुश्च पुष्करमुखासङ्गीकृतद्वारको
दुष्पारश्च गभीरमेष गतवान् मायापुरं मानसम् ।
काञ्चीस्पर्शनयोग्यतापि किमहो[1] नात्रास्ति चन्द्रानने
व्यक्तं ब्रूहि विशत्वसौ वणिगृणीत्याह [स्म] कृष्णः क्वचित् ॥१५६
क्वचिन्निकुञ्जमन्दिरे प्रसूनतल्पविस्तरे
महामणीन्द्रचत्वरे महेन्द्रसौधजित्वरे ।
मिथो विमर्दनस्खलत्प्रसाधनादि[2]राधन[3]-
प्रवर्तमानमानसं सहासमाह माधवम् ॥१५७॥
क्व भूषणानि सन्ति मे क्व[4] च द्वितीयमम्बरं
क्व केशपाशबन्धनं क्व वा कपोलचन्दनम् ।
त्वया[5] हृतानि तानि मे दुरन्तचौरचातुरीं
विहाय देहि सत्वरं विधेहि वेह सत्वरम् ॥१५८॥
सुविश्रुता हि ते पदोस्तुलादिकोटि[6]शून्यता
विहारहारिभूषणौ स्तनौ तवापि सुन्दरि ।
अनङ्गदौ[7] च ते करौ समस्तलोकविश्रुतौ
पुरो द्वितीयमम्बरं समस्तलोकविस्तरम् ॥१५९॥
इदञ्जगाद सादरं तथा तदङ्गसङ्गतं
चकार चारुभूषणव्रजं व्रजेन्द्रनन्दनः ।
क्वचिन्निमेषवर्जितप्रसारिताम्बुजेक्षणौ
परस्पराङ्गमाधुरीं निरी[8]क्ष्य ताश्च वि[9]स्मितौ ॥१६०॥
क्वचिच्च पुरुषायितां प्रियतमां वहन् वक्षसा
स्वयञ्च ललनाकृतिर्भवति वेपमानाकृतिः ।
न चा[10]लयति भीतवत् सशपथं निरस्यन्नमू-
म[11]चुम्बयदिवाकुलो निजमुखान्मुखं सुभ्रुवः ॥१६१॥

---

1. Ms. ०मि० 2. Ms. ०धा० 3. Ms. ०वा० 4. Ms. ०चि०
5. Ms. कृ० 6. Ms. ०शृणु० 7. Ms. ०त्य 8. Ms. ०वेक्ष
9. Ms. ०स्मृ० 10. Ms. ०नप० 11. Ms. ०ममूस्वच०

क्वचित् फणिवधूगणैर्निजफणामणीन्द्रोत्करैः
सतारककलानिधिद्युमणिवीतिहोत्रादिभिः ।
सभाजनपरायणैर्विहितचारुनीराजनौ
रराजतुरुदञ्चितस्मितमनोहरश्रीमुखौ ॥१६२॥

मयूरचमरीचयैर्मधुरवेणुनादाहृतैः
प्रसारिततरैर्मनोहरकलापसच्चामरैः ।
समेत्य परितः स्थितैः समभिवीज्यमानौ मुदा
ददर्श मनुजेश्वरः क्वचन मञ्जुकुञ्जोदरे ॥१६३॥

क्वचित्त्रिदशनायकोपवनदेवताभिः समं
समस्तवनदैवतैर्विविधपुष्पहारादिभिः ।
विभूषितकलेवरौ मलयभूधराधीश्वरी-
विनिर्मितविलेपनोत्तमविचित्रचित्रोज्ज्वलौ ॥१६४॥

परस्परजिगीषयोच्चरितचारुगीतध्वनि-
प्रच[ा]यकृतमूर्छितत्रिभुवनैर्मृगाक्षीगणैः ।
सुचित्रमयकृत्रिमैरिव समन्ततः संवृतौ
क्वचिद्भुवनमोहनप्रचुरभङ्गिभिर्भूषितौ ॥१६५॥

सुरसद्मजिति स्फुटपद्मनिभे
घनवञ्जुल[मञ्जुल]कुञ्जगृहे ।
वृषभानुसुताव्रजराजसुतौ
विधिशङ्करनिर्जरराजनुतौ ॥१६६॥

निगमागमवाङ्मयसारमयौ
भुवनाद्भुतमोहनभावचयौ ।
स्मितभाषितभूषितचारुमुखौ
वररासरसाद्भुतभूरिसुखौ[1][2] ॥१६७॥

---

1. Ms. ०वा० 2. Ms. ०व०

श्रीराधामुखविम्बमम्बरमहाधारे[1] [स]नीरोदरे
यद्भाति प्रतिविम्बितं हिमकरं तन्मन्वते[2] मानवाः ।
तत्र स्वेदभरद्रुताञ्जनचयच्छायाः[3] कलङ्कायिता-
स्तत्रुट्यन्मणिहारमौक्तिकचयच्छाया[4] भ्रुवन्तारकाः ॥१६८॥

मल्लीमालतिकारसालवकुलश्रीखण्डभूमीरुहां
वृन्दारण्यभुवां प्रसूनपटलीसौरभ्यसंमिश्रितम् ।
कालिन्दीकुमुदाटवीपरिमलं किम्भूरिभारं वहन्[5]-
श्रान्तो मन्दमुपैति कुञ्जभवनं संमार्जयन्[6] मारुतः ॥१६९॥

एतस्मिन् समये महारसमये मञ्जीरहाराङ्गद-
श्रेणीकङ्क[ण]काञ्चिकाघनझनत्कारे समुन्मीलति ।
निस्पन्दा जगती तथा स्थितवती राका सराकापति-
र्ब्रह्मानन्दविशेषनिर्वृतिमिवापन्ना महायोगिनी ॥१७०॥

निष्कूज[द्व]द्विजमण्डली स्थितवती चित्रार्पितावस्थया
ध्यायन्तीव निमीलितेक्षणयुगा फुल्लत्तनूजावली ।
स्तब्धाङ्गा हरिणादयश्च करिणां यूथान्यथान्ये तथा
विश्वे विस्मयविस्मृतान्यविषया मग्नाः सुषुप्ताविव ॥१७१॥

तन्त्रीव[द्ध]युगद्वयध्वनिगतं वैजात्यमत्यद्भुतं[7]
सूक्ष्मं चिन्तयति स्म विस्मयवती मन्ये स्वयं भारती ।
प्रेमैके रसमाधुरीन्तदितरे लावण्यलक्ष्मीम्परे
केचित् सङ्गतसङ्गमङ्गलतिकाभङ्गीम्परे तुष्टुवुः ॥१७२॥

मन्दारप्रमुखप्रसूननिकरासारः[8] समन्तादभू-
द्व्योम्नोऽनाहतदुन्दुभिध्वनिरथो दिक्चक्रमुल्लासयन्[9] ।
गन्धर्वाः सुरसिद्धचारणगणा विद्याधराः किन्नरा
गायन्ति स्म तदावदातमहिमस्तोमन्तयोः[10] प्रीतयोः ॥१७३॥

---

1. Ms. ०कार 2. Ms. ०न्य० 3. 4. Ms.०छा० 5. Ms. ०न्
6. Ms. संमार्जनयन् 7. Ms. त्वज्ञी० 8. Ms.०सरे 9. Ms.०द्धे० 10. Ms. प्रा०

ततश्च देव्या स्वयमुपगम्य तेषु तेषु निभृतनिकुञ्जेषु गोवर्धन-कन्दरेषु वंशीवटभूमिषु धीरसमीरसेतुबन्धसरसीतीरवननन्दभवन-वृषभानुनिकेतनकालियह्रदकूलेषूत्प्रेक्ष्योत्प्रेक्ष्य दर्शयामास ॥१०५॥

ततश्च

यत्र य[त्र] नृपतिर्व्रजत्यसौ
प्रेमभक्तिबलचारुमानसः ।
तत्र तत्र नवहेमनीरद-
च्छायकाययुगलं निरीक्षते ॥१७४॥

ततश्च तदानीन्तनमन्दमारुतोपनीतकुङ्कुमसिन्दूरसान्द्रलाक्षारसा-र्द्रश्रमनीरशीकरलोहितायामिव पुरन्दरककुभि, निर्भरपरमलीला-सागरतरलकल्लोलान्दोलननिमग्नमूर्छितानान्तत्तद्रहस्यवार्ता इव मिथः समावेदयत्सु श्रीवृन्दावनविहङ्गराजेषु, श्रीमत्किशोरीश्वरीतत्-कालीनचरणशोभातिशयजनितपरिभवखेदवशान्निपीतगरलास्विव मित्रमृदुकरमण्डलैः प्रबोध्यमानासु निजबान्धवपुत्रीप्रेर्यमाणप्रचुरा-मृतशीकरजीव्यमानतया किञ्चिदुत्पन्नोन्मेषसमुल्लासितासु निर्य न्मधुर[मधु]व्याजेन निपीतमपि हालाहलमुद्व[म]न्तीष्विव पद्मिनीषु, विपक्षचक्रसमक्षतन्निशावसरविहरण[र]सिकश्रीमत्किशोरीश्वरी-चरणनखरकिरणकणापरिभूतदयिततया खेदवशान्मुद्रितवदनास्विव कुमुद्वतीषु, सुचिरवसुन्धरातलनिखातावस्थितमहाभाजनप्रकटकठोर-मलिमातिशय इव चिरतरसहवास[स]मासन्ननीललोहितललाटहुत-वहशिखासमाजसञ्जनिताञ्जनपुञ्ज इव बहुशो दुरन्तदन्तुरविधुन्तुद-दन्ताभिघातजनितकिणचक्र इव समुज्जृम्भमाणे हरिणलाञ्छने, श्रीमत्पौर्णमासीप्रमुखमुखोच्चार्यमाणेषु प्र[ग]भातिकमङ्गलगाथा-प्रबन्धेषु, निकुञ्जभवनेभ्यो निःसरन्तीनाञ्च मणिमयमञ्जीरहारकङ्कण

1. Ms. ०व्यू० 2. Ms. ०छा० 3. Ms. ०ता० 4. Ms. ०भ
5. Ms. ०श० 6. Ms. ०र्च्य० 7. Ms. ०र० 8. Ms. ०न

ध्वानैः पराभूयमानेषु शब्दान्तरग्रहणसामर्थे[च]षु,भगवती राज्ञा सह कालिन्दीतटमवततार ॥१०६॥

प्राह [स्म] च राजानं—"राजन्, सम्प्रति जलस्थलसम्भवानि कुसुमानि स्वयमुपचिनु कोमलानि च मनोहरपल्लवानि विशेषतश्च तुलसीमालूरदलानि दूर्वाकिसलयान्यपि। ततश्चास्मिन्नरुणोदयसमये श्रीमदरुणसारथितनयायामवगाह्यात्रैवैतदीयतरलतरङ्गशीकरनिकर-चारुसञ्चारशीतले[1] शाखितले विपुलशिलामयविशालवेदिकायामुप-विश्य विहितावश्यककरणीयकलापः सुरासुरसिद्धविद्याधरगन्धर्व-गुह्यकमनुजभुजगकिन्नररजनीचरसेव्यमानचरणसरोरुहस्य भगवतः श्रीगोपीश्वरस्य पूजनप्रणमनस्तवनादिकं विधाय तदाज्ञाप्रसाद-मासाद्य सद्य एव मया सह स्वाभीष्टदैवतचरणसरोजसन्निधान-[2]मासादयिष्यसि" ॥१०७॥

राजा तु यथाज्ञापयति भगवतीति तानि तानि कुसुमानि पल्ल-वानि दूर्वादलानि च स्वयमाहृत्य कालिन्द्यामवगाह्य विरचितसन्ध्या-वन्दनो विहितपूर्वपूर्वाङ्ग[ो] ध्यानावस्थो बभूव ॥१०८॥

तदा तु निशान्तराले दृष्टानि लीलाविलासाद्भुतानि मनोहर-चरितानि सर्वाण्येव विलोकयामास ॥१०९॥

ततश्च केवलमेकमेव निकुञ्जराजं तन्मध्ये च देदीप्यमानमणि-मयवेदिकोपरिविराजमानमहारत्नमयद्व्यष्ट[3]दलपद्माकृतिपर्यङ्कराजे विभ्राजमानममलकलधौतचन्द्रचञ्चलाचयचारु[4]नव्यनीरद[5]निवहमनो-हरं किमपि कमनीयमद्वन्द्वायमानमालोकयन् निस्पन्दनिमीलिताक्षः क्षणमासीत्[6] ॥११०॥

ततो विहितकर्तव्यावशेषः सह भगवत्या निजकरकलितकुसुम-[स]ञ्चयभरितपत्रपुटः प्रथमतो भगवन्तं श्रीगोपीश्वरतया प्रसिद्ध-

1. Ms. ०लै 2. Ms. स्वा० 3. Ms. ०ह्या० 4. Ms. ०रण०
5. Ms. सी० 6. Ms. ०मास ॥

[1]मादिभूतमपि निखिलप्रपञ्चस्य श्रीमद्वृन्दाप्रभृतिभिरखिलैश्च व्रज-भुवनवासिभिरभिपूज्यमानं विलोक्य मुदितमानसो मानसोपचारैः स्वयमाहृतैश्च कुसुमसम्भ[ा]रै[2]ः सभाजयामास ॥१११॥

तत्र च नानाविधानि भेदभ्रमापनोदनानि स्तुतिवचनानि शुश्राव ॥११२॥

यथा

[3]त्वं विश्वेश्वरतामुपैषिन जगन्नाथोऽसि किं श्रीधरः
श्रीकण्ठो[4]ऽसि पतिर्गिरामसि ततो नो वा गिरीशः किमु ।
विश्वध्वंसक नो जनार्दनपदेनाभाष्यते किं भवान्
किं नो मोहयसे विभिन्नवचनैरेकार्थसंवादिभिः ॥१७५॥

द्यावाभूमिगिरां दिशामधिपते गोपालता न त्वयि
श्रीमद्गोकुलगोकुलाधिप भवान् किन्नो पशूनाम्पतिः ।
ध्यातस्त्वं निरयान् निहंसि निखिलान् यस्माद्विभो पापि[नां]
तस्मात्त्वं नरकान्तको न किमसि भ्रान्तिं विभो नाशय ॥१७६॥

नाथ त्वं यदुवंशनाशनपटुः किं नासि कामान्तक-
स्त्रैलोक्यं पिबसि त्वमन्तसमये किं नासि पीताम्बरः ।
यद्वैरोचनियज्ञखण्डनकरस्त्वं नो मखध्वंसको
मास्मान् मोहय भिन्नशब्दनिवहैरेकार्थसंवादिभिः ॥१७७॥

पादाम्भोजमृणालितामरधुनीदेदीप्यमानाकृति-
स्त्वं गङ्गाधरतान्तनोषि न किमु त्रैलोक्यचूडामणे ।
मध्याद्यन्त[5]विहीन हाच्युतताया[6]ऽनन्ताजताभ्यां पुन-
स्त्वं विभ्राजसि मा विमोहय जनानेवंविधैर्नानापदैः ॥१७८॥

---

1. Ms. ०मनादि० 2. Ms. ०वैः 3. Ms. विश्वेत्याश्वरता०
4. Ms. ०ण्ठा० 5. Ms. has one redundant नी after विहीन
6. Ms. ०नान्त्या०

यर्हि त्वं भगवान् पुमान् सहचरी पद्माथ वाग्देवता
द्वारि[1] भ्राजति ते जयश्च विजयो देवेन्द्रवृन्दस्तुतः ।
त्वच्छ्वेद्योषिदहो तदा भगवती सा भारती श्रीस्तथा
स्यादेवं विजया जया च विजयः सोऽयं जयस्तत्परः ॥१७६॥

दधानो व्यालोलं बहलहलमुदाममुषलं
भुजाभ्यां भीमाभ्यां रुचिरहिमचन्द्रद्युतिधरः ।
कदापीच्छावेगादपि विरचितैरुज्ज्वलभुजै-
स्त्रिशूलादीन् धत्से त्वमिह शितिकण्ठः सुरपते ॥१८०॥

नव्याम्भोधरसान्द्रसुन्दररुचे[2] धत्से चतुर्भिर्भुजै-
र्मुण्डश्चाभयमप्यसिं वरमहो आलम्बिताश[ा]म्बरः[3] ।
लीलामेत्य कदापि कामपि ततः[4] पीताम्बरः सुन्दरः
शङ्खञ्चक्रमथो गदां सरसिजं तैरेव धत्से भुजैः ॥१८१॥

कदापि मृतशोणितप्रवरघोरधाराधरां
दधासि दनुजाननप्रकरमालिकां कामपि ।
कदापि सुरभीकृतव्रजमहीमहीन्द्रोपमां
स्रजम्भजसि सु[न्द]रीमखिलसुन्दरीभिर्वृतः ॥१८२॥

कदापि वकधेनुकप्रबलकेशिकंसादिभिः[5]
करोषि रणमद्भुतं नवपयोदकान्तिद्युते ।
कदापि महिषासुरोद्ध[त]शुम्भनिशुम्भादिभिः
प्रसीद करुणाम्बुधे मयि कृपाकटाक्षं क्षिप ॥१८३॥

मिथ्योद्यज्जगदैन्द्र[ज]लिकमहाशैलूष[व]द्भूमिकां
त्वं नानेह तनोषि[6] नाद्भुतमिदं त्रैलोक्यचूडामणे ।
निर्मायेदृशमक्षमाकुलधियं[7] मायागुणेनासकृद्-
बद्ध्वा यत् क्षिपसीह मोहजलधौ किं ते महत्त्वं ततः ॥१८४॥

---

1. Ms. ०वि 2. Ms. ०वा० 3. Ms. ०रं 4. Ms. तत्
5. Ms. ०कौ० 6. Ms. ०धि 7. Ms. ०यां

इत्याकर्ण्य ससाधुवादं बहुधा प्रशशंस [सा] भगवती । [११४]
भूपालस्तु—

त्रिलोकीत्रातारं त्रिभुवनगुरु[ं] त्र्यक्षरमयं
त्रिमूर्तिं त्रैगुण्यातिगपरमतत्त्वाकृतिमयम् ।
त्रयीतत्त्वं तुर्यं तुहिनगिरिपुत्रीप्रणयिनं
तमःश्यामग्रीवं त्रिपुरहरमीडे त्रिनयनम् ॥१८०॥

गिरीशं गौरीशं गणपतिगुरुं गीष्पतितनुं
गुरुं गीर्वाणानां गगनचरगीताद्भुतगुणम् ।
गुणातीतं गूढं गिलितगरलं गानतरलं
गुहप्रेमाम्भोधिं गगनवसनं नौमि गिरिशम् ॥१८१॥

प्रपन्नार्तिध्वंसं परमपुरुषार्थामरतरुं
पिनाकं बिभ्राणं परमपुरुषं पञ्चवदनम् ।
पुरारातिं पञ्चाशुगशमनदृष्टिं पशुपतिं
प्रपञ्चक्षौणीजप्रथमपृथुवीजम्भज मनः ॥१८२॥

मुरारातेर्मित्रं मिहिरविधुनेत्रं मृतिहरं
मृगाङ्कालङ्कारं मरकतमणिश्यामलगलम् ।
मनोजन्मारातिं मधुरमृगमुद्राङ्कितकरं
महामायाकान्तं मुकुरमणिकान्तिं स्मर मनः ॥१८३॥

पञ्चास्यं पशुपाशमोचनकरं पूर्णेन्दुकोटिप्रभं
पार्वत्या दयितं प्रपन्नजनताभीष्टप्रदं भावनम् ।
पूर्णानन्दमयं पुराणपुरुषं पञ्चाशुगध्वंसनं
प्रोन्मत्तं पितृकाननान्तरचरं प्रेतैः परीतं भजे ॥१८४॥

---

1. Ms. ०ग० 2. Ms. ०ति० 3. Was पावनम् the original reading ?

सिद्धीनां सुरशाखिनं[1] सुरपतिं स्वर्वाहिनीमौलिनं
सान्द्रानन्दमयं सुधाकरकलाचूडं श्मशानप्रियम् ।
शार्दूलाजिनवाससं स्मरहरं शेषाङ्गदं शाश्वतं
शर्वं सर्वमयं शिवं शिवमयं सेवे शिवावल्लभम् ॥१८५॥

भ्राम्यद्भैरवभैरवीभिरभितो भूतैः प्रभूतैर्वृतं
भूतेशं भृशभूतिभूषिततनुं भीमं भवध्वंसनम् ।
भक्तानामतिभानुभूभयहरं भालेक्षणं भव्यदं
भ्राजद्भास्करमेश्वरानलदृशं[2] भक्त्या भवं भावये ॥१८६॥

केलीकल्पितकालकूटकवलं कङ्कालकाकोदरा-
लङ्कारं करुणार्द्रकोमलमतिं कामद्विषं कामदम् ।
काशीशं कलिकालकल्मषहरं कुन्देन्दुकम्बुप्रभं
कान्ताक्रान्तकलेवरार्धमनघं कामेश्वरं भावये ॥१८७॥

वन्दे मन्दरकन्दरोदरचरं कैलासशैलेश्वरं
देवेशं करिपुण्डरीकविलसच्चर्माम्बरं सुन्दरम् ।
राजत्काञ्चनपुष्पयुग्मरचितश्रोत्रावतंसोज्ज्वलं
भक्ताभीष्टकरं वराभयकरं सर्वेश्वराधीश्वरम् ॥१८८॥

प्रपद्यन्ते ये त्वां[3] प्रणवपदसारं सुरगुरुं
श्रुतीनां सर्वस्वं प्रणमदखिलार्थार्पणपणम् ।
न तेषां दुष्प्रापं क्वचिदपि कथञ्चित् किमपि च
प्रभुत्वं सर्वेषामुपरि विबुधानां विजयते ॥१८९॥

इत्यादीनि च व्याजहार ॥११५॥

तत्रैवावान्तरभुवनभूषणायमानां सरणिमतिमनोहरां सुनिभृतां समासाद्य देवी प्राह [स्म]—"महाराज, किमिदानीमत्र पश्यसि"। राजा तु सप्रणामाञ्जलिः प्रत्याह [स्म] ॥११६॥

---

1. Ms. ०नां 2. Ms. ०शां 3. Ms. ०षां

पश्याम्यत्र महासरोजमभितो देदीप्यमानं महा-
तेजोराशिमयञ्च योजनगणायामं[1] किमप्यद्भुतम् ।
हंसास्तत्र चरन्ति किन्तु निभृतञ्चाभ्यस्तमौनव्रता-
श्चाञ्चल्यं मरुतोऽपि नात्र किमिदं चित्रं कृपाब्धे वद ॥११०॥

ततश्च सुमधुरस्मितप्रसन्नवदना देवी प्राह [स्म] ॥११७॥

मथुरामण्डलमेतद्भूप सहस्रारपङ्कजं विद्धि ।
श्रीवृन्दावनभुवनं परमन्तत्कर्णिकाग्रञ्च ॥११९॥
हंसास्तत्र महान्तो भक्ताः संसारसागरोत्तीर्णाः ।
त[त्त]त्त्वमगम्यं योगिभिरपि जन्मकोटीभिः[2] ॥११२॥

इदानीन्तु ध्यानावधानसुधीरचेता विषयान्तरसञ्चारविधुरमतिः समागच्छेति[3] करेणावलम्ब्य राजानं प्रयान्ती पुरो दर्शयामास ।११८

राजन् पश्य महामहीरुहवनं विश्वैकविस्मापनं
नानारत्नविचित्रमूलभुवनं विद्योतमानं पुरः ।
बालार्कद्विजराजमण्डलनिभश्रीमत्प्रसूनोत्करं
सान्द्राम्भोधरवृन्दमेदुरमहाशाखावितानोज्ज्वलम् ॥११३॥

पश्येमाः सरसीरसीमसलिलाः प्रोत्फुल्लदिव्योत्पल-
श्रेणीः कूजदनन्तहंसनिवहाः स्वान्तप्रसादप्रदाः ।
पश्योद्दामलताः प्रफुल्लकुसुमा रम्याणि हर्म्याणि च
श्रीचिन्तामणिमण्डपञ्च पुरतो यत् स्वर्गसीमायितम् ॥११४॥

अस्याभ्यन्तरचारिणं सुरतरोर्मूले निसर्गोज्ज्वले
पश्य द्व्यष्टदल[ा]म्बुजाकृतिमहासिंहासनं शोभनम् ।
अस्मिन् पश्य किमप्युदारमहिमस्तोमं महोमण्डलं[4]
नास्त्यत्रावसरो गिरां परिचितप्रायन्तव क्षमापते ॥११५॥

---

1. Ms. ०यं 2. Ms. ०त्व० 3. Ms. ०च्छु० 4. Ms. ०नं०

श्रुत्वा काञ्चनचम्पकाचिररुचिस्तोमोरुकान्तिच्छटां
दिव्येन्दीवरनव्यनीरदघटानीलोत्पलश्यामलाम् ।
दीप्तिं काञ्चन काञ्चनोज्ज्वलमहामाणिक्यमुक्तामया-
लङ्कारैः खचितान्तरे सुमधुरस्मेराननाम्भोरुहे ॥१६६॥

भूपालो निपुणो निभाल्य[1] निभृतं[2] निर्णीय[3] विस्फारित-
श्रीमन्नेत्रसरोरुहो विनिपतत्[4]प्रेमास्रधाराप्लुतः ।
देव्याः पादयुगे निपत्य बहुशः साष्टाङ्गपातानतैः
स्तुत्या गद्गदया मनोज्ञपदया तुष्टाव तुष्टान्तरः ॥१६७॥

दूरादेव निरीक्ष्य सुस्मितमुखीं श्रीप्रेमभक्तिं महा-
देवीं श्रीवृषभानुजामुररिपू सन्दर्शितात्यादरौ ।
एह्येहीति मुहुः प्रसारितभुजद्वन्द्वौ समालिङ्गना-
रम्भाडम्बरराजमानपुलकौ प्रोच्चैः[5] समाजुह्वतुः[6] ॥१६८॥

आदावेव सखीगणैः सुनिभृतं विज्ञापितं श्रावितां-
ख्यानं कीर्तितकीर्निकृत्यनिचयं क्ष्मापालचूडामणिम् ।
देव्याङ्गीकृतमित्यसीमपरमप्रेमार्द्रदृक्प्रेङ्खितैः
सान्द्रानन्दसुधारसैरिव समुत्क्षिप्तैः स्म संसिञ्चतः ॥१६९॥

ततश्च प्रेमभरमन्थरा[*] प्रणतान्तां समुत्थाप्य युगपदेव निर्भर-
मालिलिङ्गतुः । पप्रच्छतुश्च स्वागतमपि क्षेमोदन्तसन्तानं, विनय-
[म]सृणं विहिताञ्जलि चेदमाहतुः [स्म] । यथा—देवि, त्वदधीनोऽ-
यञ्जनोऽनन्यपरायण इति सममेव ॥११६॥

देवी तु सप्रणामाञ्जलि[: प्राह स्म]—त्वदीयास्मीत्येतावन्मात्रमेव
मम गौरवं, किन्तु मत्प्रेमपात्रं प्राणमिव द्वितीयं भूमीपतिमेनमनु-

---

1. Ms. ०न्य 2. Ms. ०भू० 3. Ms. ०र्ण्य० 4. Ms. ०श्व०
5. Ms. ०म्व० 6. This is incorrect. The correct form is समाजुहुवतुः । प्रोच्चैस्तमामाह्वताम् may be a correct reading.

कम्पयतु। ततो दूरादेव भूमिनिपतितं भूमिपतिं सादरमाहूतम्पुनश्चरणान्तिकभूमण्डनायमानकलेवरं सममेव निजनिजभुजद्वन्द्वनिर्भरपरिपीड़ितञ्च विधाय स्वस्ववदनाम्बुजताम्बूलरसधारामस्य प्रसारितेऽञ्जलिपुटे प्रददौ ॥१२०॥

असौ तु कृतार्थोऽस्मीति प्रसादीकृताममृताधिकास्वादरमणीयां [तां] समास्वादयामास ॥१२१॥

ततश्च [भगवान् प्रोवाच] ॥१२२॥

राजंस्त्वं कृतकृत्य एव भवतो यद्यन्मनोऽभीप्सितं[1]
सर्वं पाणितले विभावय निजे दीर्घायुरास्तां तव।
शीघ्रं प्राप्नुहि सन्ततिं समुचितां कीर्तिं तथा सम्पदो
राज्यं सुस्थिरमस्तु यावदवनीं वंशे त्वदीये ध्रुवम् ॥२००॥

तदिदानीं कृतकर्तव्योऽसि, साम्प्रतमनयास्मदाराध्यया श्रीप्रेमभक्तिमहादेव्या महाविमानमारुह्य निजराजधानीं प्रति प्रतिष्ठमानः श्रीमदुत्तरकोशलां ममापि राजधानीमवलोक्य भगवत्या समादिष्टेन पथा विशालां नगरीम्प्रति सम्प्रति प्रतिष्ठस्व[2] ॥१२३॥

ततश्च विहि[त]बहुप्रणतिनु[तिः] स राजा[3] यथाज्ञापयसीति तदायतनसीमानमतीत्य देव्या सह विमानमारुरोह[4] ॥१२४॥

ततो देवी तत्तत्प्रदेशमवलोकयन्ती राजानमपि दर्शयन्ती प्राह [स्म] ॥१२५॥

यथा राजन्—

वृन्दारण्यमिदं विलोकय ततो भाण्डीरसंज्ञं ततः
ख्यातं तालवनञ्च काम्यकवनं गोवर्धनोऽयं गिरिः।
अत्रोलूखलबन्धनं त्विह[5] हता सा पूतना राक्षसी
चात्राघानि[6] बकासुरोऽत्र च तृणावर्तोऽपि विध्वंसितः ॥२०१॥

---

1. Ms. ०स्मि० 2. Ms. ०स्व० 3. Ms. ०माजं 4. Ms.०ती०
5. Ms. ०नू० 6. Ms. ०मालि

[1]अत्राघासुरघातनं पुनरितः सम्मोहनं ब्रह्मणः
पानञ्चात्र हुताशनस्य निहतो वत्सो वृषोऽत्रापि च ।
अत्राध्वंसि च धेनुकोऽत्र च हतो घोरः प्रलम्बासुरः
पश्यैतद्वनभोजनस्थलमिदं ख्यातं त्रिलोकीतले ॥२०२॥

[2]राजन् पश्य पुरो विभाति महती श्रीरासकेलिस्थली
यस्या नास्ति तुला समस्तभुवनेष्वेषा कलिन्दात्मजा ।
अक्रूरोऽत्र रथे हलायुधहरी संस्थाप्य नीरान्तरे
दृष्ट्वा तौ तत उत्थितोऽपि रथगौ तुष्टाव तुष्टान्तरः ॥२०३॥

एषा श्रीमथुरा मनोहरपुरी राजन् पुरा श्रीमता
शत्रुघ्नेन निवेशिता भगवता हत्वा महावैरिणम् ।
दुर्वा[रं] लवणं महेश्वरमहाशूलायुधं तत् पुरः
श्रीशत्रुघ्ननिकेतनं निरुपमन्तीर्थं समालोकय ॥२०४॥

एतत्तत् परमं पदं ध्रुवमहाभागस्य यत्राभवत् ।
सान्निध्यं करुणाम्बुधेर्भगवतस्तस्मिन् प्रसादोऽपि च ।
[3]एतन्मल्लनिपातनस्थलमितश्चापस्य भङ्गः पुरः
कंसध्वंसनमत्र मागधचमूविध्वंसनं भूपते ॥२०५॥

इति दर्शयन्ती विमानादवतीर्य राजन् वन्दस्व मधुपुरीमित्युवाच राजा तु यथाज्ञापयति भगवतीति तथा कृत्वा पुनरपि देव्या सह विमानमारुरोह । ततः पुनरपि देवी प्राह [स्म] ॥१२६॥

[4]राजन् पश्य पुरी विभाति महती हिण्डीरपिण्डोपम-
स्फूर्जत्पाण्डरसौधमण्डलमयी देदीप्यमानप्रभा ।
प्राकारैः परिखाभिरुज्ज्वलपरीणाहा पताकाकुलै-
रुद्दीनैः सरयूतटे विजयते श्रीमद्रघूणाम्पतेः ॥२०६॥

---

1. Ms. अत्र अघा० 2. Ms. ०म० 3. Ms. श्या० 4. Ms. ०रो

ततश्च पुरीसविधमागत्य विमानादवरुह्य सरयूमवगाह्य पुरीमध्यमागत्य तत्र च प्रासादमध्यविराजमानमहासिंहासनाधिष्ठितं श्रीसीतासौमित्रिसमीरसूनुभरतशत्रुघ्नमूर्तिसहितं चतुर्दशभुवनाधिपतिसमाजसम्पूज्यमानं श्रीराजराजेश्वरविग्रहन्ददर्श[1] हर्षभरगद्गदमानसश्च तुष्टाव ॥१२७॥ यथा—

पद्मायताक्षं कमलासनस्थं
श्यामं नवाम्भोधरकान्तिकान्तम् ।
राजाधिराजं जगदेकनाथं
श्रीरामचन्द्रं शरणं प्रपद्ये ॥२०७॥

स्मेराननं पद्मपलाशनेत्रं
किरीटिनं चन्द्रपरार्धकान्तिम् ।
श्रीजानकीनाथमना[थ]नाथं
श्रीरामचन्द्रं शरणं प्रपद्ये ॥२०८॥

विभीषणाराधितपादपद्मं
सुग्रीवसौमित्रिनिषेविताङ्घ्रिम् ।
दशाननध्वान्तसहस्रभानुं
श्रीरामचन्द्रं शरणं प्रपद्ये ॥२०९॥

महाभुजं कुण्डलमण्डितास्यं
पीताम्बरं कोटिदिवाकराभम् ॥
आजानुबाहुं विधुभानुनेत्रं
श्रीरामचन्द्रं शरणं प्रपद्ये ॥२१०॥

श्रीपार्वतीशङ्करगीतकीर्तिं
ब्रह्मादिसम्पूजितपादपद्मम् ।
यं तारकं ब्रह्म वदन्ति वेदा-
स्तं रामचन्द्रं शरणं प्रपद्ये ॥२११॥

---

1. Ms. has one redundant न after ददर्श

वेदान्तपातञ्जलसांख्यसारं
सर्वागमाम्भोनिधिरत्नमेकम् ।
महानुभावं महिमाम्बुराशिं
श्रीरामचन्द्रं शरणं प्रपद्ये ॥२१२॥

अपारसंसारसमुद्रसेतू-
भूताङ्घ्रिपङ्केरुहमप्रमेयम् ।
कारुण्यसिन्धुं कमनीयमूर्तिं
श्रीरामचन्द्रं शरणं प्रपद्ये ॥२१३॥

प्रचण्डमार्तण्डसहस्रजित्वर-
प्रतापसन्तापितवैरिमण्डलम् ।
असंख्यचन्द्रोज्ज्वलकीर्तिमण्डलं
श्रीरामचन्द्रं शरणं प्रपद्ये[1] ॥२१४॥

वेदान्तवेद्यं प्रणवैकगम्यं
योगैकसारं यमिनां शरण्यम् ।
अचिन्त्यमव्यक्तमनन्तमाद्यं
श्रीरामचन्द्रं शरणं प्रपद्ये ॥२१५॥

यन्नाम काश्यां मणिकर्णिकायां
मुमूर्षतां श्रोत्रपुटे महेशः ।
ददाति मुक्त्यै करुणाम्बुराशिं
तं रामचन्द्रं शरणं प्रपद्ये ॥२१६॥

महामहोदारपराक्रमाढ्यं
मोहापहं भक्तमहोदयञ्च ।
महामहोल्लासविलाससिन्धुं
श्रीरामचन्द्रं शरणं प्रपद्ये ॥२१७॥

---

1. The meter demands twelve letters in each line, but here we have eleven. गतोऽस्म्यहम् in place of प्रपद्ये removes the metrical mistake.

साकेतपुर्यां वरहर्म्यमध्ये
महार्हसिंहासनराजमानम् ।
राजश्रियालङ्कृतमेकवीरं
श्रीरामचन्द्रं शरणं प्रपद्ये ॥२१८॥

संवीज्यमानं भरतेन भक्तया
शत्रुघ्नसौमित्रिविभीषणाद्यैः ।
सचामरैः कुन्दतुषारशुभ्रैः
श्रीरामचन्द्रं शरणं प्रपद्ये ॥२१९॥

हनूमताराधितपादपद्मं
संस्तूयमानं सनकादिभिश्च ।
वीणाकरैस्तुम्बुरुनारदाद्यैः
संकीर्त्यमानं[1] रघुनाथमीडे ॥२२०॥

सवृंहितैर्मत्तकरीन्द्रवृन्दैः[2]
सहेषितैस्तुङ्गतुरङ्गसङ्घैः ।
सानन्दमुद्ग्रीवमुदीक्ष्यमाणं[3]
श्रीरामचन्द्रं शरणं प्रपद्ये ॥२२१॥

वैतालिकैः कुण्डलमण्डितास्यैः
समागधैर्वन्द्यसुचारुकाव्यैः ।
संस्तूयमानं रघुवंशकेतुं
श्रीरामन्द्रं शरणं प्रपद्ये ॥२२२॥

बद्धाञ्जलीनां नतकन्धराणां
दिगीश्वराणां निकरैः समन्तात् ।
प्रकीर्यमाणं कुसुमैरनेकैः
श्रीरामचन्द्रं शरणं प्रपद्ये ॥२२३॥

---

1. Ms ०य० 2. Ms. सं० 3. Ms. ०सुग्रीव०

विद्याधरीणां सुरसुन्दरीणां
सकिन्नरीणां निकरैः पुरस्तात् ।
तौर्यत्रिकैः सम्परितोष्यमाणं
श्रीरामचन्द्रं शरणं प्रपद्ये ॥२२४॥

वक्त्रैश्चतुर्भिश्चतुराननेन
पञ्चाननेनाननपञ्चकेन ।
षड्भिर्मुखैश्चैव षडाननेन
संस्तूयमानं रघुनाथमीडे ॥२२५॥

वेदैश्चतुर्भिर्धृतचारुदेहै-
र्मन्त्रैस्तथा विग्रहवद्भिरुच्चैः ।
संस्तूयमानं प्रणवेन सार्धं
श्रीरामचन्द्रं शरणं प्रपद्ये ॥२२६॥

आद्यैर्मरीचिप्रमुखैर्मुनीन्द्रै-
रामीलिताक्षैर्गलदश्रुधारैः ।
निरीक्ष[थ]माणाङ्घ्रिसरोजयुग्मं
श्रीरामचन्द्रं शरणं प्रपद्ये ॥२२७॥

कन्दर्पकोटिद्युतिदेहकान्ति-
संमोहिताशेषसुराङ्गनाभिः ।
निमेषहीनैर्नयनैरजस्रं
निरीक्ष्यमाणं रघुनाथमीडे ॥२२८॥

वृन्दारकैरम्बरतोऽवतीर्णै-
र्मन्दारसन्तानकदामवृन्दैः ।
संपूज्यमानाङ्घ्रिसरोजयुग्मं
श्रीरामचन्द्रं शरणं प्रपद्ये ॥२२९॥

इन्दादिवृन्दारकवन्द्यमान-
पदारविन्दं जगदेकवन्द्यम् ।
आनन्दकन्दं निजलोकबन्धुं
श्रीरामचद्रं शरणं प्रपद्ये ॥२३०॥

वीणादियन्त्रैर्मृदुमन्द्रनादैः
कल्पितस्वरग्रामकमूर्छनाभिः ।
गन्धर्वराजैरुपगीयमानं
श्रीरामचन्द्रं शरणं प्रपद्ये ॥२३१॥

मृदङ्गभेरीपटहप्रणादै-
रालोकयालोकयतारशब्दैः ।
स्वस्तीतिशब्दैर्जयशब्दमिश्रैः
सन्तोष्यमाणं रघुनाथमीडे ॥२३२॥

दौवारिकावेदितभूरिनम्र-
सोपायनद्मापतिवृन्दमुच्चैः ।
प्रसारितापाङ्गमवेक्षमाणं
श्रीरामचन्द्रं शरणं प्रपद्ये ॥२३३॥

स्मितावलोकेन च तर्पयन्त[1]-
माश्वासयन्तं करपल्लवेन ।
प्रजा[:] प्रजानाथमुदारसत्त्वं[2]
श्रीरामचन्द्रं शरणं प्रपद्ये ॥२३४॥

कटाक्षपातैरितकोषनाथ-
विकीर्णनानाविधरत्नजातैः ।
कृतार्थयन्तं निखिलार्थिसार्थं
श्रीरामचन्द्रं शरणं प्रपद्ये ॥२३५॥

---

1. Ms. ०न्तु० 2. Ms.०त्वं०

श्रीलक्ष्मणावेदितराजकार्य-
माकर्णयन्तं चलकुण्डलेन ।
श्रोत्रेण सङ्कोचितलोचनान्तं
श्रीरामचन्द्रं शरणं प्रपद्ये ॥२३६॥

अनन्तकर्कोटकतक्षकाद्यैः
समुज्ज्वलद्भिः[1] स्वफणामणीन्द्रैः[2] ।
नीराज्यमानाङ्घ्रिसरोजयुग्मं
श्रीरामचन्द्रं शरणं प्रपद्ये ॥२३७॥

वाण्या भवान्याम्बुधिकन्यया च
कन्याभिरन्याभिरमर्त्यजातेः ।
प्रदीपमालाभिरुदारभाभि-
र्नीराज्यमानं रघुनाथमीडे ॥२३८॥

किरीटरत्नद्युतिनिर्जिताभि-
स्ताराभिराराधनतत्पराभिः ।
नीराज्यमानं मणिरत्नदीपैः
श्रीरामचन्द्रं शरणं प्रपद्ये ॥२३९॥

मुखेन्दुबिम्बद्युतिनिर्जितेन
ताराधिराजेन नराधिराजम् ।
नीराज्यमानं निजचन्द्रिकाभिः
श्रीरामचन्द्रं शरणं प्रपद्ये ॥२४०॥

दिनप्रदीपेन कुलप्रदीपं
सहस्रसंख्यैः[3] किरणप्रदीपैः ।
नीराज्यमानं निजयोरुकान्त्या
विराजमानं रघुनाथमीडे ॥२४१॥

---

1. Ms. ०ज्व० 2. Ms. स० 3. Ms. ०घैः

पादाम्बुजद्वन्द्वसुचारुशोभा-
लोभाकुलैर्भृङ्गकुलैः समन्तात् ।
भाङ्कारघोषैः स्तुतपादपद्मं
श्रीरामचन्द्रं शरणं प्रपद्ये ॥२४२॥

मन्दाकिनीमानसराजहंसै-
रपूर्वपाथोजधियातिहृष्टैः ।
उपास्यमानाङ्घ्रिसरोजयुग्मं
श्रीरामचन्द्रं शरणं प्रपद्ये ॥२४३॥

अमन्दवैदग्धरसप्रवाह-
विलोलितापाङ्गतरङ्गितेन ।
श्रीजानकीवक्त्रमवेक्षमाणं[1]
श्रीरामचन्द्रं शरणं प्रपद्ये ॥२४४॥

प्रचण्डकोदण्डसकाण्डतूण-[2]
विराजमानोभयपार्श्वदेशम्[3] ।
सुरासुरैरर्चितपादपद्मं
श्रीरामचन्द्रं शरणं प्रपद्ये ॥२४५॥

इति स्तुत्वा प्रणम्य देव्या सह विमानराजमारुरोह ॥ ततश्च पुनरपि देवी प्राह [स्म] ॥१२८॥

राजन् पश्य पुरो विभाति सरयूस्वर्लोककल्लोलिनी-
सम्भेदो यमुदाहरन्ति कृतिनस्तीर्थं महापावनम् ।
क्षेत्रं दर्दुरसंज्ञितं पुनरिदं रम्यो महानाश्रमो
वाल्मीकेश्च[थ]वनस्य चात्र पुरतो धन्या विदेहक्षमा ॥२४६॥

1. Ms. क्ष्य० 2. Ms. ०म० 3. Ms. ०र्श०

एतत्तज्जनकपुरं वदन्ति धीरा
यत्रासीज्जनकमहीपतिर्महात्मा ।
योगीन्द्रस्त्रिपुरनिसूदनेन चापं
विन्यस्तं स्वयमपि यत्र तोषितेन ॥२४७॥

तस्माद् वेगवशात् क्षणेन परमं श्रोगण्डकीगङ्गयोः
सम्भेदं समुपेत्य तत्र विहितस्नानादिकृत्योत्करः ।
प्रोत्तीर्यामरनिम्नगां जववशादासाद्य विद्योतितां
रम्यां फल्गुतटे गयामवतरन् क्ष्मापालचूडामणिः ॥२४८॥

दृष्ट्वा विष्णुपदं विधाय परमां पूजाञ्च तस्यादरा-
त्ततीर्थाखिलकृत्यमाचरितवान्[1] देव्याज्ञया भक्तितः ।
आरुह्याथ विमानराजमतुलं दिव्यं[2] मनोरंहसं
मन्दारे मधुसूदनं परमया भक्त्या नृपो दृष्टवान् ॥२४९॥

तन्तुष्टाव ननाम देव्यनुमतस्तस्मात्[3] प्रयातस्त्वरन्
दूरादेव ददर्श काननवरं श्रीवैद्यनाथाश्रमम् ।
दृष्ट्वा तं परिपूज्य शान्तहृदयः श्रीवैद्यनाथं विभुं
नत्वारुह्य विमानमैक्षत ततो वक्रेश्वरं शङ्करम् ॥२५०॥

कृत्वा तत्परिपूजनस्तुतिनतीः[4] श्रीपञ्चकूटे गिरौ
दृष्ट्वा श्रीरघुनाथलक्ष्मणमहीपुत्रीसमीरात्मजान् ।
भक्त्यापूजयदुत्तमस्तुतिशतैः सन्तोषयन् दण्डव-
न्नत्वा रामपदाङ्कमैक्षत मुदा तञ्चार्चयद्भक्तितः ॥२५१॥

आरुह्याथ विमानमुत्तमजवं शीघ्रं प्रयातोऽम्बिकां
दृष्ट्वाथो जगदम्बिकां भगवतीं सिद्धेश्वरीमार्चयत् ।
तस्मादेत्य नवाधिकारुचिरां श्रीगुप्तपल्लीपुरीं
[श्री]वृन्दावनचन्द्रमैक्षत तथा श्रीरामचन्द्रं विभुम् ॥२५२॥

---

1. Ms. ०त्या० 2. Ms. मनोहरहंसं 3. Ms. प्रयात्स्तरन् 4. Ms. ०म०

भक्त्या तौ परिपूज्य शीघ्रमगमच्छ्रीमत्त्रिवेणीतटं[1]
स्नात्वा तत्र नृपो जगाम झटिति श्रीमद्विशालां पुरीम् ।
तत्रागत्य विमानराजसहिता राज्ञा समभ्यर्चिता
देवी प्राह महीपते तव हृदि स्थास्याम्यहं निश्चला ॥२५३॥

राजन्नस्तु सुदीर्घमायुरपि ते शीघ्रं तथा सन्तति-
र्योग्या चाक्षयतामुपैतु परमा श्रीः कीर्तिरप्येधताम् ।
आधिव्याधिविपक्षपक्षविपदां निःशेषनिर्मूलनात्
प्राज्यं राज्यमतीवमोदतरलो नित्यं चिरम्पालय[2] ॥२५४॥

किन्तु

श्रीवाणेश्वरसंज्ञितं द्विजवरं सर्वात्मनैवाश्रितं[3]
प्रेम्णाप्यायय येन निर्वृतमनास्तिष्ठेत्तवैवान्तिके ।
एष प्रत्यहमेव ते वितनुतें भूत्यै तथैवापदां
शान्त्यै स्वस्त्ययनं त्वदाश्रिततया ख्यातश्च भूमण्डले ॥२५५॥

अन्यप्रतिग्रहनिवृत्तिकरीञ्च वृत्तिं
ग्रामान्वितामुभयकीर्तिविवृद्धिहेतुम् ।
सेतुञ्च खेदजलधेरयमिच्छतीह
सन्तोष्यतां द्रुतमसौ समुपाश्रितस्त्वाम् ॥२५६

जीयान्माणिक्यचन्द्रस्तव सचि[व]वरः पुत्रपौत्रप्रपौत्रै-
र्धन्यः श्रीरामचन्द्रार्चननिभृतमनोवृत्तिरुद्दामकीर्तिः ।
पतेनात्यर्थयुष्मत्प्रणयनयभृता[4] शौर्यगाम्भीर्यवीर्य-
प्राचुर्याश्चर्यचर्याचयजितगुरुणा पाहि भूमीश्चिराय ॥२५७॥

इत्युक्त्वा च तेन विमानराजेन परमसाधनाख्येन देवी हृदयमवनी-पतेर्विवेश ॥१२९॥

ततश्च प्र[ा]भातिकमङ्गल्यमृदङ्गशङ्खपटहध्वनिभिर्वन्दिवृन्दनान्दी-नादैश्च व्यपनीतनिद्रो महीमहेन्द्रः पर्यङ्कादुत्तस्थौ ॥१३०॥

---

1. Ms. ०त् श्री० 2. Ms. ०त्या 3. Ms. ०रा० 4. Ms. ०भू०

उत्थाय च कृतनित्यक्रियः श्रीगुरुदेवसन्निधौ भूमीसुरसभायां शाण्डिल्यमभिमुखीकृत्य[1] तमशेषतः स्वप्नवृत्तान्तमावेदयामास ॥१३१

सर्वे च सविस्मयमाकर्ण्याशीर्भिः संवर्धयामासुः ॥१३२॥

यथा ॥

चेतश्चन्द्रकचूडचारुचरणे चन्द्राभचञ्चन्नख-
श्रेणीचारुविभूषणे चरतु ते चाञ्चल्यहीनं चिरम् ।
चण्डीचन्द्रकलाविलासिमुकुटश्चूर्णीकरोत्वापद-
श्चण्डान् विद्विषतश्चराचरगुरुस्त्वां पातु चक्रायुधः॥२५८॥

आसीद्भूपतिचक्रमौलिमुकुटो यः कृष्णरामः कृती
तत्पुत्रो जगदादिरायसुकृती ख्यातो धरामण्डले ।
तस्मादद्भुतकीर्तिचन्द्रकिरणश्रेणीनिरस्ताखिल-
ध्वान्तौ[घो]ऽजनि कीर्तिचन्द्रसुकृती क्ष्मापालचूडामणिः ॥२५९॥

यद्दानेन च दैन्यशून्यमभवद्भूमण्डलं सर्वतः
स्वप्नेऽपि स्मरति प्रतीपनृपतिर्यद्दोर्द्वयीविक्रमम् ।
श्रीराधामुरवैरिचारुचरणद्वन्द्वैकचिन्तापरो
यो योगेन तनूममुञ्चदमले स्वर्वाहिनीवारिणि ॥२६०॥

पुत्रस्तस्य महीभुजः समजनि श्रीमान् गुणाम्भोनिधि-
र्विद्याभिर्विनयैर्नयैरभिनयैः प्रेङ्खत्प्रतापोच्चयैः ।
प्रादुर्भूय महाभुजः सुरपुरीनाथं कृतावग्रहं
सम्पातैर्विविधान्नसञ्चयमयैर्जित्वा जहासेव यः ॥२६१॥

सप्तग्रामसमीपधाम परमं श्रीगुप्तपल्लीति य-
च्छ्रीवृन्दावनचन्द्रनन्दितमपि श्रीरामचन्द्रोज्ज्वलम्[2] ।
यत्र स्वर्गधुनीतरङ्गनिकराः स्वर्वर्त्मसेतूपमा
विद्वांसो निवसन्ति त[त्र च] महापुण्यातिधन्या जनाः ॥२६२॥

---

1. Ms. ०द्द० 2. Ms. ०त् श्री०

तत्राश्रान्तबुधेन्द्रसुन्दरयशःसन्तानसन्तानस-
द्वंशोत्तंसपरम्परा विजयते शोभाकरस्योत्तरा ।
यत्रामित्रबुधद्विपेन्द्रदमनप्रोद्दामकण्ठीरवो
वादीन्द्रः कविवक्त्रकैरवरवियों[1] रामनामा कृती ॥२६३॥

जातोऽस्मादतुलो यथा दशरथाच्छ्रीराघवेन्द्रस्तथा[2]
धीरेन्द्रो भुवि राघवेन्द्रसुकृती ख्यातो धरामण्डले ।
यस्मात् कामपि लब्धवानथ महाविद्यां यदात्मोद्भवो
विष्णुर्जिष्णुरभूदभूतसदृशः सिद्धान्तवागीश्वरः ॥२६४॥

यत्काव्योदयतः शिलापि मृदुला वज्रं शिरीषायते
विद्वांसः परिघूर्णयन्ति नितरां मूर्धानमूर्ध्वाननाः ।
यद्विद्या यशसा निगद्यत इह ब्रह्माण्डभाण्डोदरे
तस्याभूत्तनयः सुरेज्यसदृशः सत्तर्कवागीश्वरः ॥२६५॥

पुत्रस्तस्य [च] रामदेवकृतिनः श्रीयुक्तवाणेश्वरो
धीरश्रीयुतचित्रसेनधरणीनाथेन संवर्धितः ।
चम्पूङ्कामपि निश्चलेन मनसा तस्याज्ञया निर्ममे
विद्वांसः परिशोधयन्तु कृपया तेभ्यो ममास्तां नतिः ॥२६६॥

ध्यात्वा श्रीरामचन्द्रं सह जनकसुतालक्ष्मणाभ्यां प्रयत्ना-
दाज्ञामाज्ञाय राज्ञामपि मुकुटमणेश्चित्रसेनाह्वयस्य ।
शाके कालाङ्कतर्कौषधिपतिगणिते[3] कार्तिकीये दशांशे
पूर्णां श्रीचित्रचम्पूं व्यतनुत दिवसे श्रीलवाणेश्वराख्यः ॥२६७॥


शकाब्दाः ॥१६६६॥

---

1. Ms. has one redundant व after कैरव 2. Ms. ०त् श्री०
3. Ms. ०ङ्क०

धीरः श्रीचित्रसेनः क्षितिपतितिलकः श्रीलमाणिक्यचन्द्रो
मन्त्रिस्तोमाग्रगण्यस्तदुभयमिलनं रत्नहेमाभिषङ्गः ।
आस्तां भूभूषणाय प्रकटितमहिमा पुत्रपौत्रप्रपौत्रैः
स्फूर्जद्दीप्तिश्चिराय प्रथयतु परमं कीर्तिकर्पूरराशिम् ॥२६८॥

इति महामहोपाध्यायमहाराजाधिराजसभास्तारवरश्रीयुत-
वाणेश्वरविद्यालङ्कारभट्टाचार्यविरचिता
चित्रचम्पूः समाप्ता ॥



Corrigenda.

Page	6	Foot-note	1	Line	3	*Read*	Ādiśūra	*For*	Adiśūra
...	8	...	8	...	3	...	भैरवी	...	भरवी
...	9			...	14	...	Alivardi	...	Aliverdi
...	17	...	33	...	4	...	विप्रेण	...	विप्रेण।
...	18			...	5	...	Singh[34]	...	Singh
...	19			...	3	...	Khan[37]	...	Khan
...	26	...	47	...	8	...	बर्गि	...	वर्गि
...	28	...	48	...	3	...	चम्पूरित्य०	...	चम्पूरत्य०
...	घ			...	10	...	०सेनस्य	...	०सेनस्ये
...	४	...	4			...	०वोम्मोहिनीं	...	विम्मोहिनीं
...	५			...	7		Place a Comma after च		
...	६			...	22	*Read*	०रङ्कु०	*For*	०रङ्क०
...	७			...	10	...	०पूर्वा	...	०पूर्वां
...	८	...	3			...	०र्वं	...	र्वं
...	१३			...	21	...	०काङ्कुर०	...	०काङ्कर०
...	१४			...	19	...	०संवर्ध्य०	...	०सवर्ध्य०
...	१५			...	7	...	सार्धं	...	सार्धं
...	...			...	8	...	युक्तार्थं	...	युक्तार्थं
...	१०			...	18	...	भिन्नेन	...	भिन्नन
...	२३			...	8.	1 should be on ०त्त्वो *not* on ०ही०			
...	२६			...	6	*Read*	०बाध्य०	*For*	०वाध्य०
...	२७			...	21	...	विचित्रवीर्यं		विचित्रवीर्यं
...	३०			...	15	...	सायन्तन०[3]	...	सायन्तन०

... ३६	...	4	...	आश्चर्यं	...	आश्चर्यं
... ३७	...	1	...	आश्चर्यं	...	आश्चर्यं
... ...	..	7	...	सर्वं	...	सर्वं
... ...	...	25	...	सर्वं	...	सर्वं
... ४०	...	4	...	०पताक [ा]०	...	०पताक। [ा]०
... ४१	...	17	...	बद्ध्या	...	बद्ध्वा
... ४२	...	16	...	०सिंहासन०	...	सिंहासन०
... ४५	...	5	...	तीर्थं	...	तीर्थं
... ...	...	8	...	०स्तीर्थं०	...	०स्तीर्थं०
... ४६	...	22	...	०दपूर्वं	...	०दपूर्वं
... ४८	...	22	...	तीर्थं	...	तीर्थं
... ५२	...	4	...	०बाधित०	...	०वाधित०
... ५४	...	2	...	०र्बाधित०	...	०र्वाधित०

... ५६ Foot-note 4. Delete.

... ६८ Line 17 *Read* तन्त्रीबद्ध० *For* तन्त्रीवद्ध०

... ६९ ... 15 Place a hyphen after निर्य

... ... 24 ... ... ०कङ्कण

... ७१ ... 7 *Read* ०मुपैषि न *For* ०मुपैषिन

... ७४ ... 17 ... त्वां ... त्वा

... ७८ ... 16 ... विध्वसनं ... विध्वंस नं

... ७९ ... 11 ... ०परार्ध० ... ०परार्ध्य०

... ८६ ... 11. 2 should be on म० not on ०व्यं

... ८७ ... 15 *Read* ०विवृद्धि० *For* ०विवृद्धि०

On page 6, Foot-note No. 1. the name of Bāṇeśvara's great great grandfather has been mentioned as Paramānanda. But the poet while giving his pedigree in the Text (Verse, 263) mentions his name as Rāma.